# छान्दोग्योपनिषत्

[illegible]

[illegible]

देवर्षिभट्टश्रीरमानाथशास्त्री

S
294.592 1
R 141

Chandogyopnishat

॥ श्रीहरिः ॥

दैवजीवोद्धारपरायणसकलाचार्यचूडामणिजगद्गुरु-
श्रीमद्वल्लभाचार्यचरणप्रकटितशुद्धाद्वैत-
पुष्टिमार्गप्रकाशनपरभाष्यसंवलिता

# छान्दोग्योपनिषत् ।

## प्रथमाध्यायः ।

भगवद्धर्मबोधनामकं तद्भाष्यं च

एतच्च

विद्याविलासिश्रीनाथद्वाराधीशश्रीमद्गोस्वामिकुलतिलकश्रीमद्गो
वर्धनलालजीमहाराजचरणानामाज्ञया दर्शनादर्शायने-
कसंस्कृतप्राकृतदार्शनिकग्रन्थलेखकुशलेन देवर्षि-
भट्टश्रीरमानाथशास्त्रिणा निर्मितं
पूर्वोक्त-

महाराजचरणद्रव्यसाहाय्येन
प्रकाशतां नीतं च

---

श्रीवल्लभाब्दाः ४४९-संवत् १९८४ ।

76
1708
Revised Rs. 2/-

9190
26.3.66.

मुम्बय्यां
मणिलाल इच्छाराम देसाई इत्यनेन स्वीये 'गुजराती' पत्रस्य
"न्यूस मुद्रणयन्त्रालये"
मुद्रयित्वा प्रकाशिता ।
काळाघोडा, बेक-हाउस लेन, फोर्बस स्ट्रीट, कोट-मुंबई.

Library IIAS, Shimla
S 294.592 1 R 141
00009190

॥ श्रीहरिः ॥

# इदमिह किंचिदुच्यते ।

वेदो हि सर्वविद्याविज्ञाननिधानत्वाद्भगवन्माहात्म्यस्वरूपावगति-साधनत्वाद्भगवन्निश्वासत्वाच्च परमं प्रमाणमिति भारतीयानामास्तिकविदुषां घण्टाघोषः । अत एवात्र प्रायो बहव एवास्तिकमताचार्याष्टीकां भाष्यं वा विरचयांचक्रुरिति न परोक्षं प्रेक्षावताम् । शुद्धाद्वैतपुष्टिमार्ग-भगवद्धर्मप्रकाशनपरमाचार्याः श्रीमद्वल्लभाचार्या वेदोपनिषत्सु परं प्रामाण्यमभ्युपगच्छन्तोपि स्वतन्त्रतया तद्विवेचनं न चक्रुरिति न नो विश्वासमुपयान्ति धियः । वयं तु प्रतीमः सदपि तद्ग्रन्थान्तरमिव विलीनमभूदिति ।

अथापरे तदाचार्यचरणवंश्या विद्वदास्तिकभूषणाः प्रतिवादिविधूननदक्षा गोस्वामिश्रीपुरुषोत्तमश्रीगोपेश्वरमहाराजप्रभृतयोप्युपनिषत्सु टीकाटिप्पणभाष्यादिकं विस्तृतमेव प्राणैषुरिति संभाव्यते । यतो लभ्यन्त एव तेषु बहुशष्टीका स्तेषां सम्प्रत्यपि ।

पण्डितप्रकाण्डं भारतमार्तण्डो भट्टश्रीगोवर्धन ( गट्टूलालजी ) महाशयश्चोपनिषत्सु लेखिनीमात्मनो व्यापारयामासेति तत्कठोपनिषद्भाष्येण विज्ञायते ।

अथापि वैदिकसाहित्ये श्रीमद्वल्लभाचार्यसिद्धान्तप्रकाशनपरेयं सामग्री नितान्तमेव तनुरिति नो बुद्धिः । सम्प्रत्यपि छान्दोग्यादिमहोपनिषदोऽपेक्षन्त एव समयेऽस्मिन्सरलां शुद्धाद्वैतसिद्धान्तसम्बन्द्धां व्याख्याम् । तत एव च परमाराध्यचरणश्रीमद्वल्लभाचार्याणामन्येषां च तद्वंश्यमतल्लिकानां ग्रन्थान्विलोक्य ममाप्युपनिषत्सु किमपि लेखितुमुत्साहः समजनि ।

उपनिषत्सु छान्दोग्योपनिषद् बृहदारण्यकोपनिषद् कठाद्युपनिषद्वा यथा गम्भीरतराऽणुभाष्यादिसूत्रभाष्योपकारिणी न तथा गोपालतापिन्यादयः। सरलास्ताः कठिनतमा चेयं छान्दोग्योपनिषत्। तत्राप्यस्याः प्रथमाध्यायः। विशेषतस्तु आंग्लमहाविद्यालयेष्वधीयानैः शांकरभाष्यादिविलोकननिर्विण्णैर्वाल्लभमतीयविद्यार्थिभिः सानुरोधमेव वाल्लभमतानुगतभाष्यादिविरचनायोत्तेजिताः ततश्चास्माभिः पूर्वमस्यैवोपरि भगवद्धर्मबोधभाष्यविलिखनेन सोयमुत्साहः पर्यणामि। प्रथमोऽयमुत्साहस्य परिकरः। छान्दोग्यसदृश्याश्च भाष्यमिदम्। विलिख्यचेदं यथा श्रीमन्नाथद्वाराधीशगोस्वामितिलकविद्वत्कुमारचिरञ्जीविश्रीदामोदरलालमहोदयसन्निधौ प्रदर्शनाय प्रहितम्। तथैव तैश्च संतुष्यास्य मुद्रणादिव्ययः प्रतिज्ञातः। वयमेतां सम्पूर्णामप्युपनिषदं भगवद्धर्मबोधभाष्यसंवलितां प्रकाशयितुमीहामहे। स्यामो यदितः परमपि भगवतोऽनुग्रहभाजनं बालहेरुत्साहप्रदानेन। इह भाष्ये क्वचित्क्वचित्संधिप्रदर्शनं ग्रन्थावगमसारल्यायोपेक्षितं क्वचिच्च तथैव रक्षितम्।

अथापि यदत्र मानुष सुलभं स्खलितं स्यात्तदमत्सराः सुधियः कर्मवैयग्रीमनुभवन्तो मर्षयन्त्विति विज्ञाप्यते। ये पुनरन्यथाऽस्माननुगृह्णन्ति तान्प्रति तु—'यदि परगुणा न क्षम्यन्ते यतस्व तदर्जने न हि परयशो निन्दाव्याजैरलं परिमार्जितुम्। विरमसि न चेदिच्छाद्वेषप्रसक्तमनोरथो दिनकरकरान्पाणिच्छत्रैर्नुदञ्श्रममेष्यसि' ॥ १ ॥

इत्युपेक्षया विरमामः।

अमत्सरविदुषामनुचरो

**देवर्षिभट्टश्रीरमानाथशास्त्री.**

श्रीकृष्णाय नमः ।

# अथ भगवद्धर्मबोधभाष्यसंवलिता

# छान्दोग्योपनिषत् ।

ओमित्येतदक्षरमुद्गीथमुपासीत ओमिति ह्युद्गायति तस्योपव्याख्यानम् ॥ १ ॥

## अथ देवर्षिभट्टश्रीरमानाथसूरिविरचितं भाष्यम् ।

मङ्गलम् ।

नमो वाचामधिष्ठात्रे तुरगास्याय विष्णवे ।
यस्य नासापुटश्वासादध्यगान्निगमान्निधिः ॥ १ ॥
अगम्यायाऽपि लब्धाय हरयेऽप्यात्मदाय च ।
वेदवेद्याय कृष्णाय नमोऽचिन्त्यात्मशक्तये ॥ २ ॥
यदनुग्रहतो यद्वाक्पथानुचलितो जनः ।
वेद वेदरहस्यार्थं वन्दे वल्लभदेशिकान् ॥ ३ ॥

अथेयं छान्दोग्योपनिषत् । चन्दते, आल्हादयति असौ छन्द आनन्दरूपो भगवान् । चदि आल्हादने प्रीतौ चेति धातोरुणादिरसुन्प्रत्यय आदेश्च छकारः । तं छन्दो भगवन्तं गायन्ति ते भगवद्भक्ता ऋषयश्छन्दोगाः । छन्दो-

गानामियं छान्दोग्या। भगवतः उप समीपे नितरां सद्यते यया सोपनिषत् माहात्म्यज्ञानपूर्विका भक्तिस्तज्जनको वेदप्रभेदोप्युपनिषत्। तत्कारणत्वात्। सा चासौ च छान्दोग्योपनिषत्। भगवन्निष्ठर्षिप्रवचनरूपो वेदभेद इति यावत्।

अत्र ह्युपायोपेयरूपो भगवान्प्रतिपाद्यः। उपेयः स्वयं रसरूपः परात्परो भगवान् पुरुषोत्तमः। यथोक्तं काठकैः 'अक्षरात्परतः परः'। अस्यामेवोपनिषदि चाष्टमाध्याये 'एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिसंपद्यते स उत्तमः पुरुष' इत्यादि। स चोत्तमः पुरुष श्रीकृष्ण एव। यथोक्तं गीतोपनिषत्सु— 'यस्मात्क्षरमतीतोहमक्षरादपि चोत्तमः। अतोस्मि लोके वेदे च प्रथितः पुरुषोत्तमः'। इति। उपायाश्च कर्मज्ञानभक्तिरूपाः। तत्र कर्मणि यज्ञादिरूपे क्रियारूपेण प्रविष्टो, ज्ञाने चिद्रूपेण प्रविष्टो, भक्तावानन्दरूपेण प्रविष्टः स एव भगवानुपायरूपोऽपि भवति। 'सेतुर्विधरणामिति' श्रुतेः। कर्मज्ञानभक्तीनामुपायानां समुच्चयः। एवमेव पूर्वोत्तरकाण्डयोरेकशास्त्रता सङ्गतिश्च भवति। अन्यथा द्वयोः काण्डयोर्भिन्नरूपत्वे भिन्नफलत्वे चैकशास्त्र्यं सङ्गतिश्च न भवति। अद्वैतभङ्गश्च भवति। द्वयोः प्रतिपाद्यस्वरूपभेदात्। न च कर्मणोऽविद्याजन्यत्वादविद्यात्वात्तत्प्रतिपादकपूर्वकाण्डस्याऽप्यविद्यावस्थायामेव प्रामाण्यस्वीकाराच्च नाद्वैतभङ्ग इति

वाच्यम् । कर्मणोऽविद्यात्वे मानाभावात् । न च ब्रह्मरूपात्मविज्ञाने जाते देहाद्यध्यासाभावात्कर्माऽपोह्यत इति कर्माऽविद्येति वाच्यम् । तत्रापि मानाभावात् । निरध्यस्तैरपि देहादिभिः कर्मकरणसंभवात् । अत एव श्रूयते 'जनको ह वैदेहो बहुदक्षिणेन यज्ञेन ईजे' । स्मृतिश्च 'ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिने'ति । अस्यामेवोपनिषदि प्रथमाध्याये 'यदेव विद्यया करोति श्रद्धयोपनिषदे'त्यादिश्रुत्या कर्मज्ञानभक्तीनां समुच्चयः कण्ठत एवोच्यते । न च 'प्लवा ह्येते अदृढा यज्ञरूपाः' इति निन्दाश्रवणात्कर्मणोऽविद्यात्वं शङ्क्यम् । तत्रापि केवलकर्मण एव निन्दितत्वात् । न ज्ञानभक्तिसहितस्य । केवलकर्मणश्च कामनया कृतत्वादविद्यात्वमस्तु । कामनाया अविद्याजन्यत्वात् ।

किंच कर्म हि सद्रूपं ब्रह्म । अत एव

श्रुतौ कर्मणः फलं मृत्युतरणमुक्तम् । न ह्यविद्यया मृत्युं तरति । 'यदिच्छन्तो ब्रह्मचर्यं चरन्ती'ति काठकैर्ब्रह्मप्राप्तौ कर्मसाधनं भवतीति कण्ठत एवोक्तम् । यत्र यत्र कर्मणो निन्दा सा तु काम्यस्यैव न ज्ञानभक्तिसहकृतस्य । कामना ह्यविद्या । अविद्याजन्यत्वात् । अत एव श्रुतौ कामनाऽपोह्यत्वेनोच्यते 'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः' इति कठे । तस्मात्कर्मज्ञानभक्तयः परस्परोपकारका उपाया इति युक्तम् । तत्र पूर्वकाण्डेन कर्मप्रतिपादितम् । उत्तर-

काण्डरूपयाऽनयोपानिषदा च भगवतः पुरुषोत्तमस्य सपरिकरस्य ब्रह्मणो विज्ञानं भक्तिश्च प्रतिपाद्यते । सेयमुपनिषद्-ष्टाध्यायी । तत्र प्रथमाध्याये कर्मज्ञानभक्तिभगवद्धर्मरूपमुपासनं सपरिकरमुच्यते । तत्रापि प्रथमखण्डे कर्माभ्युदयरूपमुपासनमुच्यते । तस्येयं प्रथमा श्रुतिः—'**ओमित्येतदक्षरमि**'**त्यादि** ।

**ओं इत्येतदुच्चार्यमाणमक्षरं** चतुष्पाद्वर्णरूपमुद्गीथमुदुच्चैः सर्वोत्तमत्वेन सर्वशास्त्रैर्गीयते तं भगवन्तमुपासीत । ओंकाराक्षरेण तमनुसन्दध्यात् । भगवन्नाम्नि ओंकाराक्षरे भगवदभेदभावनया तद्विचारजपादिसत्काररूपामुपासनां कुर्यादिति तात्पर्यम् । ओंकारस्य भगवन्नामत्वात् । नामवन्नाम्नोरभेदाच्च । तथा च श्रुत्यन्तराणि 'ओमित्यक्षरं सर्वं तस्योपव्याख्यानम्' 'तमेतमात्मानमोमिति' 'प्रपञ्चोपशमः शिवोऽद्वैत ओंकार आत्मैव' इति । शिव आनन्दरूप इति तत्रार्थः । स्मृतिश्च 'ओंतत्सदिति निर्देशो ब्रह्मणः' । 'तस्य वाचकः प्रणवः' । उपासनं नाम भगवद्रूपे वस्तुनि ज्ञानेनान्यथावगतेऽपि 'सर्वं खल्विदं ब्रह्मेति' शास्त्राज्ञया तद्बुद्धिं विधाय स्वरूपानुरूपं सत्कारकरणम् । 'अन्नं ब्रह्मेति' इत्यत्रापि तथाविधमेवोपासनम् । सर्वस्य ब्रह्मरूपत्वादन्नेपि ब्रह्मभावो वर्तत एव, किन्तु जनः स्वाज्ञानेनान्नादिपदार्थांस्तथा न पश्यति न मनुते च । तत्स्वाज्ञानमनेन शास्त्रेणापनीय

ब्रह्मरूपेऽन्नादौ ब्रह्मभावं स्थिरीकृत्यान्नादिसत्कारं कुर्यान्नाव-मन्येत चेति तत्र यथार्थस्तथाऽत्राऽपि 'ओमित्यक्षरमुद्गीथ-मुपासीते'ति श्रुतिवाक्यस्योंकारं भगवन्नाम भगवदभिन्नं ध्यायेदिति युक्तोऽर्थः। प्रणवस्य भगवद्वाचकत्वान्नित्यसंब-न्द्धत्वाच्चोद्गीथरूपेणानुसन्धानं जपाद्युपासनं च युक्तमेव । उच्चैरेकस्वरेण सर्वोत्कृष्टतया गीयते वर्ण्यत इत्युद्गीथो भग-वानित्युक्तम् । तदेतत्सर्वं हेतुमुखेन स्वयं श्रुतिराह—**ओमिति ह्युद्गायतीति ।**

**ओमि**त्युच्चार्य श्रुतिर्ब्रह्मवेत्ता वा भगवन्तं **उद्गायति** निरूपयति । **इति** हेतोः ओंकारः उद्गीथ इत्यर्थः । **तस्य** भगवतः ओंकारः **उपव्याख्यानं** साक्षाद्वर्णनम् । तस्मादों-कारं उद्गीथं भगवन्तमनुसन्दध्यादिति युक्तोऽर्थः ।

ये पुनरत्र '**एवं नामत्वेन प्रतीकत्वेन च परमा-त्मोपासनसाधनं श्रेष्ठ**'मित्याद्युक्त्वा ओंकारस्योद्गीथ-त्वेनानुसन्धानं परमात्मोपासनसाधनं वदन्ति, न परमात्मो-पासनम् । तदुपनिषदक्षरानुसन्धानविरुद्धम् । वेदाक्षरैस्त-दाशयस्यास्पृष्टत्वात् । तद्विरुद्धत्वाच्च । अयमाशयः— येषां मते ब्रह्मैव वस्तु तदन्यत्सर्वमवस्तु । तेन तन्मतेऽवस्तुनि मिथ्यावस्तुनि वोपचाराद्वस्तुत्वमारोप्य सत्कारकरणं नामो-पासनं सिद्ध्यति । तथाचोंकारोपि वर्णत्वात्प्रतीकत्वान्नाम-त्वाच्चावस्त्वेव । तथापि तस्मिन्नुद्गीथबुद्धिं कृत्वा परमात्मो-

पासनं तद्वारा कर्तव्यमिति तदाशयः । तदेतत्सर्वमुपनिषदक्षरार्थविरुद्धत्वात्कल्पनैव । प्रत्युत 'साक्षाद्वाचकः परमात्मनः इति स्मृत्या 'तत्ते पदं संग्रहेण प्रब्रवीम्योमित्येत'दिति श्रुत्या चोंकारस्य भगवत्त्वं निरूप्यते तदाशयस्त्वेतद्विरुद्धमिति विद्वद्भिर्निभालनीयम् ॥ १ ॥

**एषां भूतानां पृथिवी रसः पृथिव्या आपो रसोऽपामोषधयो रस ओषधीनां पुरुषो रसः पुरुषस्य वाग्रसो वाच ऋग्रस ऋचः साम रसः साम्न उद्गीथो रसः ॥२॥**

**एषामित्यादि** । **एषां** प्रत्यक्षतो दृश्यमानानां **भूतानां** सत्त्वेन व्यपदेष्टुं शक्यानां लौकिकपदार्थानां चेतनशरीरादीनां **पृथिवी** बहुगुणवती गंधविशेषवती च भूः **रसः** धारणकर्त्रीत्वात्सारतरा । अस्तीति सर्वत्रोन्नेयम् । **पृथिव्याः आपः** जलानि **रसः** स्वरूपप्रदानि । तस्यास्तत्कारणत्वात् । **अपां ओषधयो** वनस्पतयो **रसः** सारः । तासां तन्मयत्वात् । **ओषधीनाम**न्नादिरूपाणां **पुरुषो** देहेन्द्रियप्राणान्तःकरणाध्यासवांश्चेतनो **रसः** सारः । तासां तदाधारत्वात् । **पुरुषस्य** देहिनो **वाक् रसः** स्वरूपप्रदा । वाचैव हि पुरुषो जीवन्विज्ञायत इति । **वाचो** वाङ्मयस्य **ऋक्** तद्विधाः श्रुतयो **रसः** सारः । भगवत्प्रतिपादकत्वात् । **ऋचः**

श्रुतीनामपि **साम** गानरूपस्तन्नामा वेदो रसः । श्रोतृवक्त्रो रसोत्पादकत्वात् । **साम्नस्तद्वेदस्य,** उपलक्षणविधया सर्ववेदाना**मुद्गीथ** ओंकारो रसः सारः । भगवद्वाचकत्वात्तत्स्वरूपत्वाच्च ॥ २ ॥

न केवलमोंकारो रसएव किन्तु ब्रह्मरूप इत्याह—

**स एष रसानां रसतमः परमः परार्घ्यो-**
**ऽष्टमो यदुद्गीथः ॥ ३ ॥**

**स एषेत्यादि** । **सो**ऽनुद्भूतस्वरूपत्वात्परोक्षब्रह्मरूपः वोक्तः, **एष** वाचिवर्तमान ओंकारो **रसानां** पूर्वोक्तानां भूतादीनामुत्तरोत्तरसाररूपाणां **रसतमः** सारतमः । ब्रह्ममयत्वात् । **परमः** परो भगवान्मीयते ज्ञायतेऽनेनेति परमः—भगवत्प्रापकः । तन्नामत्वात् । **परार्घ्यः** परमश्रेष्ठः । ब्रह्मरूपत्वात् । रसरूपपृथिव्यादिगणनयाऽष्टमः । **यत्** य **उद्गीथः** ओंकारः ॥ ३ ॥

उद्गीथस्य सर्वश्रेष्ठतां ब्रह्मरूपतामुद्घाटयितुमाशङ्कते—

**कतमा कतमर्क्कतमत्कतमत्साम कतमः**
**कतम उद्गीथ इति विमृष्टं भवति ॥४॥**

**कतमा कतमेति** । 'एषां भूताना'मित्यादिश्रुत्या पृथिव्याद्युद्गीथान्तानां रसरसतमत्वाद्युक्तम् तत्र पृथिव्यादिवागन्तानां प्रसिद्धत्वादापाततः स्वरूपं ज्ञातप्रायं, ऋक्सामो-

द्गीथानां तु तन्न ज्ञातमिति पृच्छति श्रुतिः श्रुत्यन्तरात्—**कतमेति** । जातौ व्यक्तिप्रश्नः । कतमा कतमेति द्विरुक्तिः प्रश्नादरद्योतनार्था । या पूर्वमुक्ता ऋग्जातिस्तस्यां ऋग्व्यक्तिः **कतमा** किं स्वरूपा किं कारणेति चेत्यर्थः । या च सामजातिरुक्ता तस्यां साम व्यक्तिः **कतमत्** किंस्वरूपमिति यावत् । च वा पुनरुद्गीथजातिरुक्ता तस्यामयमुद्गीथः कतमः किंस्वरूपः इत्यर्थः । **इति** एवं प्रकारेण **विमृष्टं** विचारितं भवति । विचारणैषा क्रियत इत्यर्थः ॥ ४ ॥

तत्रोत्तर श्रुतिरेवाह—

**वागेवर्क्प्राणः सामोमित्येतदक्षरमुद्गीथः तद्वा एतन्मिथुनं यद्वाक्च प्राणश्चर्क्च साम च ॥ ५ ॥**

यत्पृष्टं किंस्वरूपा ऋक्सामोद्गीथा इत्यादि, तत्रोच्यते वाक् एव ऋक्, प्राणः साम, ओं इति अक्षरं उद्गीथ इति । ऋचां वाक् कारणमिति तत्कार्यमृक् वागेव । कार्यस्य कारणरूपत्वात् । साम गानरूपं तच्च प्राण एव । गीतस्य प्राणकार्यत्वात् । प्राणस्य तत्कारणत्वात् । ओं इति एतत् अक्षरं उद्गीथः । अकारोकारमकारनादात्मकः **ओम्, इत्येतत्** भगवन्नामात्मकं, **अक्षरं** वर्णात्मक उद्गीथः उच्चैरेकस्वरेण सर्वशास्त्रैर्गीयते वर्ण्यत असावुद्गीथो भगवान् । उक्तं च

**'वेदैश्च सर्वैरहमेव वेद्यः'** इति गीतोपनिषदि । ओंकारश्चाक्षरं भगवन्नामत्वादुद्गीथ एव । न क्षरतीत्यक्षरम् । वर्ण इति प्रयोक्तव्येऽक्षरप्रयोगेन वेदाक्षराणां नित्यत्वमपि सूच्यते । ततश्च ये केचन वेदस्य वेदाक्षराणाञ्चाध्यस्तत्वमनित्यत्वं च वदन्ति ते सर्वथा चिन्त्याः ।

नन्वेवं ज्ञातेपि किं फलं, ? सर्वकामाप्तिः फलं स्यादित्याह—**तद्वा एतदित्यादि । यत्** यौ वाक् च प्राणश्च तदेतद्द्वयं मिथुनमिव मिथुनम् । युगलमित्यर्थः । परस्परसहचरत्वात्कामसंपादकत्वाच्च वाक्प्राणयोर्मिथुनत्वोक्तिः । वाक्प्राणावेवर्क्सामरूपेणाभिव्यक्ताविति श्रुतौ तयोरपि सहभावेनोक्तिः, **ऋक् साम चेति,** न तु ते द्वे मिथुने । तत एव मिथुनमित्येकवचनम् । अयमाशयः—ऋक्सामनी हि वाक्प्राणसाध्ये । कर्माणि ऋक्सामसाध्यानि । कर्मसाध्याश्च सर्वे कामाः । ततश्च सर्वकामावाप्तिमूलं वाक्प्राणावित्यागतम् । वाक्प्राणर्क्सामानि चत्वार्योंकार एकीभवन्तीति सर्वकामावाप्तिसाधनमोंकार इत्युद्गीथस्य भगवतो रसतमत्वमनया श्रुत्या विचारितं व्यञ्जनया ॥ ५ ॥

सदृष्टान्तमोंकारस्य सर्वकामप्राप्तिसाधनत्वं श्रुतिरेवाह—

**तदेतन्मिथुनमोमित्येतस्मिन्नक्षरे संसृज्यते यदा वै मिथुनौ समागच्छत आपयतो वै तावन्योन्यस्य कामम् ॥ ६ ॥**

**तदेतदित्यादि** । **तदेत**दृक्सामरूपेण परिणतं वाक्-प्राणात्मकं मिथुनं युग्म**मोमित्येतस्मिं**श्चतुष्पादे भगवन्ना-**म्न्यक्षरे** नित्यवर्णे नित्यवर्णसमूहे वा **संसृज्यते** संयुक्तं स्थितमस्ति । तस्मादेष ओंकारः सर्वकामावाप्तिसाधनं वेदि-तव्यः । तत्र दृष्टान्तमाह—**यदेति** । लोके **यदा मिथुनौ** मिथुनाङ्गभूतौ स्त्रीपुंसौ **समागच्छतः** संमिलतस्तदा **ताव-न्योन्यस्यै**कैकस्य परस्परं **कामं** मनोरथा**नापयतः** पूरयतः । **वै** तथाऽत्रापि ज्ञेयमित्यर्थः । यथा तयोर्मिलनं मनोरथपूरकं भवति तथाऽत्राप्योंकारे वाक्प्राणयोः संसृष्टिः, सर्वकाम-पूर्तिकरी भवतीत्यर्थः । तेन चोंकारोपासनं सर्वमनोरथ-पूरकं सिद्धम् ।

तत्स्वयं स्वमुखेन श्रुतिराह—

## आपयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते ॥७॥

**आपयितेति** । **ह** निश्चयेन **वै** तद्दृष्टान्तेन ज्ञातं भवति यत्—**यः** कश्चन तदधिकारी, नतूद्गाता एवेत्यर्थः । एतदों-कारमक्षरस्वरूप**मेवं** सर्वमनोरथदातृत्वेन **विद्वान्** जानन्नु-**द्गीथं** भगवन्तमुपास्ते जपति ध्यायति च स हि **कामानां** सर्वमनोरथानामापयिता । लुटो रूपम् । तेन प्राप्स्यति प्रापयिष्यति चेत्यर्थः । अथवा तृजन्तत्वादस्तिनाऽन्वेयम् ॥७॥

समृद्धिगुणं चोंकारोपासनमित्याह—

**तद्वा एतदनुज्ञाक्षरं यद्धि किंचानुजाना-त्योमित्येव तदाहैषो एव समृद्धिर्यदनुज्ञा समर्धयिता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्ते ॥८॥**

**तद्वेति—वा** किंवा **तदेत**दोंकारोऽ**नुज्ञाक्षरं** स्वेष्टमनोरथपूर्तिसम्मतिप्रत्युत्तरमस्ति । **यत्** यतो **हि** प्रसिद्धमिदं यः कश्चन कस्यचित्**किंचन** प्रार्थन**मनुजानाति** स्वीकरोति स **एष** तदा **'ओं'** इत्याह **एव** कथयत्येव । तस्मादनुज्ञारूपो यदोंकाराक्षरं तत्सर्वकामसमृद्धिरूपमेव । **यो ह** यश्चेत्यर्थः । **एतदक्षर**मोंकाराक्षर**मेवं** सर्वसमर्धकत्वेन **विद्वान्** जानन्**नुद्गीथं** भगवदभिन्नं न तूद्गीथावयव**मुपास्ते वै** निश्चयेन स पुरुषः स्वस्य परस्य च कामानां समर्द्धयिता समृद्धिकरो भवति ।

अत्र केचनो**द्गीथ**मित्यस्योद्गीथावयवमित्यर्थं कुर्वन्ति तदसङ्गतमिव भाति । तथाहि—'ओमित्युद्गायती'त्युपनिषत्प्रारम्भश्रुतावुद्गीथस्योंकारो नामेत्युक्तम् । ततश्च यथा नाम्नि गृहीते वस्त्वेव गृहीतं भवति न तु तदवयवस्तथाऽत्राप्योंकारनाम्नोद्गीथ एव गृहीतो भवति न तूद्गीथावयवः । न हि कलश इत्युक्ते कलशावयवः केनापि गृहीतो भवति तद्वत् ॥ ८ ॥

ओंकारवाच्यस्योद्गीथस्य सर्वकामसाधकत्वमेव समर्थयति युक्त्यन्तरैः खण्डसमाप्तिपर्यन्तम्—

**तेनेयं त्रयी विद्या वर्तत ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गायत्येतस्यैवाक्षरस्यापचित्यै महिम्ना रसेन ॥ ९ ॥**

**तेनेति** । **तेन** पूर्वोक्तेनोमित्यक्षरेण**ेयम्**ऋग्वेदादिलक्षणा **त्रयीविद्या** वेदविद्या तत्प्रतिपाद्यं कर्म च **वर्तते**, स्वात्मानं निर्वहतीत्यर्थः । कथं निर्वहति तदेव कथयति—**ओमिति** । ज्योतिष्टोमादावो'मित्युद्गीथमध्वर्यु**राश्रावयति** होता चोमिति **शंस**त्युद्गाताऽप्योमि**त्युद्गायति** । किमर्थं तदित्याह—**एतस्येति** । तदाश्रावणशंसनोद्गानादिकं सर्वमेतस्याक्षरस्यैवा**पचित्यै** पूजार्थं, माहात्म्यस्थापनाय भवतीति यावत् । केन कारणेन माहात्म्यख्यापनं भवतीत्याह—**महिम्ना रसेनेति** । **महिम्ना** ऋक्सामादिवाक्प्राणरूपमाहात्म्येन, **रसेन** घृततिलयवादिरसनिष्पन्नेन हव्येन च । हेतुनेति शेषः । अयमाशयः—वाक्प्राणरूपक्सामादिकारणरूपेणोंकारेण यज्ञा निष्पादिता भवन्ति । यज्ञैरादित्यगृहीतैर्वृष्टिर्भवति । तया च हव्यद्रव्याणि रसाश्च यागसाधनानि भवन्ति । तैश्च पुनर्यज्ञाः सम्पाद्यन्त, एवंप्रकारेण त्रयीतत्प्रतिपाद्यकर्मनिर्वाहक ओंकारः । ततश्चोंकारस्य सर्वकामावा-

प्तिसाधकत्वमाश्रावणात् शंसनोद्गानादिभिः पूजा, माहात्म्य-ख्यापनं, वा युक्तमेव । तथा च स्मृतिः 'तस्मादोमित्यु-दाहृत्य यज्ञदानतपःक्रियाः । प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्' ॥ इति । 'अग्नौ प्रास्ताऽऽहुतिः सम्यगा-दित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः' ॥ इति च ॥ ९ ॥

ननु न सर्वे उद्गीथोंकाराक्षरस्वरूपविदो भवन्ति केचनैव तद्विदो भवन्ति । तथा च ये न तद्विदस्तेषां कर्मणः फलं कीदृग्भवतीत्याशङ्कायां निर्णयं वदन्ती श्रुतिरक्षरज्ञानस्य सर्वकामाप्तिसाधकत्वं पुनः प्रपञ्चयति—

**तेनोभौ कुरुतो यश्चैतदेव वेद यश्च न वेद । नाना तु विद्या चाविद्या च । यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवतीति खल्वेतस्यैवा-क्षरस्योपव्याख्यानं भवति ॥ १० ॥**

इति प्रथमाध्यायस्य प्रथमखण्डः ।

**तेनोभाविति** । तेन पूर्वोक्तमाहात्म्यवतोंकाराक्षरेण । तदुच्चारणपूर्वकमित्यर्थः । **यश्चों**काराक्षरज्ञा**तैतदों**कार**मेवं** पूर्वोक्तप्रकारेण **वेद** जानाति, **यश्च**तद्विद्वा**नेतदों**कार**मेवं** पूर्वोक्तप्रकारेण **न वेद** न जानाति, ता**वुभा**वुद्गीथाक्षरस्वरू-

पविद्वांस्तदविद्वांश्च **कुरुतः** कर्म कुरुतः । **तु** किन्तु फलं तयोर्द्वयोर्भिन्नभिन्नं भवतीत्यर्थः । कर्मणः साधकबाधकसहकारिकारणानां बहुत्वात् । फलबहुत्वकारणान्येव निर्दिशति— **नानेति** । **विद्या च** ज्ञानमपि नानाऽनेकप्रकारा । **अविद्या च** कामनाप्यनेकप्रकारा । यो यथाज्ञानेन यथाकामनया च कर्म करोति तस्य तथा तथा कर्मणः फलं भवतीत्यर्थः ।

अयं भावः—प्राधान्येन द्विविधं ज्ञानं, तज्ज्ञानं तत्त्वज्ञानं चेति । तज्ज्ञानं परब्रह्मज्ञानम् । तत्त्वज्ञानं च ब्रह्मप्रकारज्ञानम् । यथा हि सुवर्णज्ञानं सुवर्णप्रकारभूषणादिविज्ञानं च । तत्र यथा सुवर्णज्ञानं तज्ज्ञानं, सुवर्णप्रकारभूषणादिविज्ञानं च तत्त्वविज्ञानमेवमत्रापि परब्रह्मज्ञानं तज्ज्ञानं, जडजीवादिजगद्विज्ञानं च तत्त्वविज्ञानम् । तत्त्वं नाम प्रकारः । तत्त्वानि हि जीवजडानि । एवं द्विप्रकारकं ज्ञानम् । अन्तर्ज्ञानानि तु बहूनि । न चात्र ब्रह्मणो निर्विशेषत्वान्निरवयवत्वाच्च तत्प्रकारत्वाभावः शङ्क्यः । तस्य श्रुतिषु सविशेषनिर्विशेषसावयवनिरवयोभयविधत्वस्वीकारादित्यन्यत्र विस्तरः । एवं विद्या (ज्ञानं) नाना । कामनाश्चान्तःकरणानां नानात्वान्नाना एव भवन्तीति सुस्पष्टम् । कर्मण उत्तममध्यहीनफलत्वे विभिन्नप्रकाराणि ज्ञानानि नानाप्रकाराः कामनाश्च कारणम् । यो हि यज्ञं तत्साधनानि तत्त्वानि मंत्रादींश्च ब्रह्मत्वेन विज्ञाय ब्रह्मकामनया कर्म करोति तस्योत्तमं कर्मणः फलं भवति । उत्तमत्वं ब्रह्मत्वम् । यश्च तं

तानि तांश्च देवान्तरत्वेन विज्ञाय शुद्धिकामनया तत्करोति तस्य मध्यमं फलम् । मध्यमत्वं देवान्तरसायुज्यम् । तथा च स्मृतिः 'ब्रह्मैव तेन गन्तव्यं' 'देवान् देवयजो यान्ति'। यश्चान्यथा करोति तस्य तत्कर्मणोऽन्यथा फलम् । एवं विद्याया अविद्यायाश्च नानात्वात्कर्मणोऽपि नानाफलम् ।

तत्र श्रुत्युक्तो निश्चयः क इति चेत्तत्राह–**यदेवेति । यदेव** यत्कर्मैव **विद्ययो**द्गीथोंकाराक्षरविज्ञानेन **करोति, श्रद्धया** भक्त्या **करोत्युपनिषदा** वेदोक्तपदार्थयाथात्म्यज्ञानेन च करोति **तदेव** तत्कर्मैव **वीर्यवत्तर**मुत्तमफलजनकं भवति ।

उपनिषदेत्यस्यायं भावः—वेदेहि 'यूपः सूर्यः' 'ग्रावाणः प्लवन्ते' 'प्रजापतिरात्मनो वपामुदखिदत्' इत्यादिवाक्यानि श्रूयन्ते । तानि कैश्चन प्रमत्तप्रलपितमिति मत्वा त्यज्यन्ते। कैश्चित्तु स्वांशेऽप्रमाण्ये सत्यपि 'विधिना त्वेकवाक्यत्वा'दिति न्यायेन स्तुत्यर्थत्वेन समुचितमहावाक्यप्रामाण्येन प्रमाणतया गृह्यन्ते । तयोरुभयोरप्ययुक्तत्वमनौपनिषज्ज्ञानवत्त्वं च भाति । तथा हि—प्रथमानां मते सिद्धप्रमाणभावस्य वेदस्याप्रामाण्यस्वीकारादयुक्तत्वम् । एतेनैवानौपनिषज्ज्ञानवत्त्वं व्याख्यातम् । अपरेषां वेदविचारशालिनां मतेऽपि 'ग्रावाणः-प्लवन्ते' इत्यादिवेदभागस्य विधिना सहैकवाक्यत्वात्तत्सहभावेनैव प्रामाण्ये सत्यपि स्वातन्त्र्येण स्वांशेऽप्रामाण्यस्याप्यगत्यापि स्वीकृतत्वात्तावद्वेदभागस्याप्राण्यापाताद-

युक्तत्वम् । कर्मण्यौपनिषज्ज्ञानसहकारित्वं चापेक्ष्यते । 'स य इदमविद्वानग्निहोत्रं जुहोति यथाङ्गारानपोह्य भस्मनि जुहुयात्तादृक्स्यात्' 'अथ य एतदेवं विद्वानग्निहोत्रं जुहोति तस्य सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मसु हुतं भवति' इत्यादिश्रुतिभिरन्वयव्यतिरेकाभ्यां कर्मण्यौपनिषज्ज्ञानसाहचर्यस्य कण्ठत एवोक्तत्वात् । तच्च तन्मते न स्वीक्रियते । किंच वेदे हि सर्वस्यापि वस्तुजातस्य ब्रह्मप्रकारत्वेन ब्रह्मत्वमुच्यते । एवं च सति कर्मण्यपि तत्तद्याज्ञिकपदार्थांस्तथा मत्वा कर्म कृतं चेदौपनिषज्ज्ञानवत्त्वं स्यात् । तच्च तेषां न संभवति । एकेषां मते स्वतन्त्रस्य ब्रह्मणोऽस्वीकारात् । अपरेषां च मते जगतो मिथ्यात्वस्वीकारात् । तस्माद्ये उपनिषदादिषु ब्रह्मत्वेनोक्तांस्ततत्पदार्थांस्तथैव मत्वा कर्म कुर्वन्ति तेषां तत्कृतं वीर्यवत्तरं भवतीत्युपनिषदेत्यस्य तात्पर्यार्थः ।

**इति** इत्यस्माद्धेतोः **खलु** निश्चयेन सर्व**मेतस्यैवोद्गी**था-क्षरस्य भगवन्नाम्न एवो**पव्याख्यानं** माहात्म्यख्यापनं भवति । एवमस्मिन्खण्डे प्रथमप्रकारोद्गीथोपासना प्रकाशिता ।

इति श्रीदेवर्षिरमानाथसूरिकृतौ भगवद्धर्मबोधभाष्ये प्रथमाध्यायस्य प्रथमः खण्डः ।

## अथ प्रथमाध्यायस्य द्वितीयः खण्डः ।

पूर्वखण्डे रसतमत्वसर्वकामाप्तिसर्वकामसमर्धकत्वगुणवदोंकाराक्षरोद्गीथस्योपासनमेकप्रकारकमुक्तम् । रसतम ओंकारः, सर्वमनोरथपूरक ओंकारः, सर्वमनोरथसमर्धकश्चोंकारः । एवमोंकारस्य गुणत्रयम् । स चोंकारो वर्णोऽप्यक्षरकथनेन नित्य इत्यपि सूचितम् । अक्षररूपत्वादोंकारो ब्रह्ममयः । अलौकिकशब्दराशेर्वेदस्य ब्रह्मरूपत्वादोंकारस्य च सर्ववेदमयत्वात् । अक्षररूपोऽप्योंकार उद्गीथरूपः । भगवन्नामत्वात् । उद्गीथो नाम परत्वेन गीयमानो भगवान् । उत् गीयतेऽसावुद्गीथः । तथा च काठकश्रुत्यन्तरं 'एतद्ध्येवाक्षरं ब्रह्म एतद्ध्येवाक्षरं परम्' ।

तथा चाक्षरब्रह्मरूप ओंकारोरसतमत्वादिगुणत्रयविशिष्टो भगवन्नामत्वेन भगवद्रूपोऽपि साधारणजनेन वर्ण इत्येव विज्ञायतेऽज्ञानात् । तदज्ञानं तत्स्वरूपप्रकाशकेनाऽनेन शास्त्रेणापनीयोंकारस्योद्गीथाभेदभावनाध्यानजपरूपमुपासनं कर्तव्यमित्युक्तं पूर्वस्मिन्काण्डे । अथास्मिन्काण्डेऽध्यात्मादिभिन्नभिन्नप्रकारेणोद्गीथोपासनमुच्यते । तत्रावगमसारल्याय श्रुतिराख्यायिकां विरचय्य तदुपदिशति—

**देवासुरा ह वै यत्र संयेतिर उभये प्राजापत्यास्तद्ध देवा उद्गीथमाजह्रुरनेनैनानभिभविष्याम इति ॥ १ ॥**

**देवासुरा इति** । वस्तुनिरूपकं संग्रामरूपकमिदम् । देवादीनां त्रिविधरूपत्वाद्रूपान्तरेण संग्रामसंभवादस्य रूपकस्य नासत्यत्वम् । अन्यथा रूपकस्यासत्यत्वाद्वेदेऽप्यसत्यकल्पकत्वाऽप्रतिर्दुर्वारा स्यात् । अस्मिन्खण्डे प्रथमं प्राणरूपोद्गीथोपासनमुच्यते तस्यायमुपोद्घातः ।

**देवासुरा** देवाश्चासुराश्चो**भये** विभागद्वयविभक्ताः । दीव्यन्ति द्योतन्त इति देवा इन्द्रियवृत्तयः आध्यात्मिकाः । इन्द्रियाधिष्ठातारः प्रसिद्धा इन्द्रादयोऽत्राधिदैविका देवा न ग्राह्याः । अध्यात्मप्रकरणत्वादस्य खण्डस्य । तथा चाग्रे श्रुता‘**वित्यध्यात्म**’मिति वक्ष्यते। तस्मादत्र देवशब्देनेन्द्रियवृत्तयः सत्त्वप्रधाना ग्राह्याः । असुषु प्राणनिमित्तं सर्वविषयेषु विविधं रमन्त इत्यसुरा अपि तमःप्रधाना इन्द्रियवृत्तय एव । सात्त्विकेन्द्रियवृत्तयः शास्त्रोक्तसन्मार्गगामिन्य इति देवा उच्यते । तामसाश्चेन्द्रियवृत्तयः शास्त्रोक्तसन्मार्गविमुखा इत्यसुरा उच्यन्ते । त उभये देवासुराः । **ह** ऐतिह्ये । इतिहासोयमित्यर्थः । **वै** निश्चयः । नायमसत्य इतिहास इत्यर्थः । रूपान्तरेण प्राग्जातत्वात् । सम्प्रत्यपि च प्रतिदिनं सदसद्वृत्तीनां सदसत्कार्यनिमित्तं परस्परपराभवरूपसंग्रामस्यानुभूयमानत्वात् । **यत्र** विजयनिमित्तं, **संयेतिरे** संग्रामं चक्रिरे । इन्द्रियाणां मनसश्च सत्योऽसत्यश्च बह्व्यो वृत्तयो भवन्ति, ताः प्रतिदिनं सदसत्कार्येषु परस्परमेकैकासां पराभवाय यत्नं

कुर्वन्तीत्ययं संग्रामः सृष्ट्यारम्भत एव प्रारब्ध इति सम्पिण्डितोऽर्थः ।

त **उभये** द्विविधविभागविभक्ता अपि, प्राजापत्याः प्रजापतेरात्मभवाः । ह इति हेतोः, **तत्** तत्र उभयविधेषु, **देवा** द्योतनशीला इन्द्रियवृत्तय, उद्गीथमोंकारमाजह्रुः । उद्गीयत उद्गात्रेत्युद्गीथ ओंकारः । तदुपलक्षितमौद्गातृकर्मात्रोद्गीथशब्देनोच्यते । परं तस्य केवलस्य कर्तुमशक्यत्वादुद्गीथशब्देन यज्ञ उच्यते । तत्र देवा उद्गीथोपासनरूपयज्ञमकार्षुरित्यर्थः ।

पुरुषो ह्यक्षररूपत्वात्प्रजापतिरुच्यते । यद्यपि वृत्तयो न पुरुषोपादाना किन्तु मानस्य एव तथापि मनसि तद्वृत्तिषु च पुरुषस्य ' मम मनः ' ममेयं 'मनोवृत्ति'रित्याद्यभिमानवत्वात्तदीया उच्यन्ते । तस्मादेवाऽत्र वृत्तयः प्राजापत्या-इत्युक्ताः । उभयेषां प्राजापत्यकथनात्परस्परानभिभवसामर्थ्यमपि द्योत्यते । समसामर्थ्यवत्त्वात् । तेषु देवा बुद्धिमन्तोऽसुरपराभवसामर्थ्यप्राप्त्यै उद्गीथं यज्ञरूपमुद्गीथोपासनं चक्रुः ।

अयं भावः–विशुद्धो हि प्राणो भगवद्विभूतिरूपः विशुद्धप्राणविज्ञानं भगवद्विज्ञानस्य साधनरूपामिति तत्पुरुषस्य कर्तव्यम् । वृत्तीनां विषयसांमुख्येन प्राणस्याशुद्धिर्भवति । विषयवैमुख्येन च प्राणशुद्धिर्भवति । विषयवैमुख्येन प्राणशुद्धिर्विधेया पुरुषेण । वृत्तीनां विषयसांमुख्यमधर्मः । वृत्तीनां विषयवैमुख्यं च धर्मः । धर्म एव च यज्ञ उच्यते । तथा च

स्मृतिः 'एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे' इति । धर्मश्च भगवद्रूप इति श्रुतिरुद्गीथशब्देनाऽत्र यज्ञरूपधर्ममाहरणविषयमाहोद्गी**थमाज**ह्रुरित्यनेन । कस्मै प्रयोजनायोद्गीथमाजह्रुरित्याशङ्कायामाह—**अनेनेत्यादि** । **एतान्** असुरा**ननेनो**द्गीथप्राणोपासनेन **अभिभविष्यामो** जेष्याम **इति** प्रयोजनायेत्यर्थः ॥ १ ॥

मुख्यप्राणरूपोद्गीथोपासनाहरणप्रकारं दर्शयितुं पूर्वमन्येषामिन्द्रियादीनां परीक्षामाह—

**ते ह नासिक्यं प्राणमुद्गीथमुपासांचक्रिरे तꣳहासुराः पाप्मना विविधुस्तस्मात्तेनोभयं जिघ्रति सुरभि च दुर्गन्धि च पाप्मना ह्येष विद्ध इति ॥ २ ॥**

**ते हेति**। **ते** देवाः सात्त्विकेन्द्रियवृत्तय इत्यर्थः। **ह** प्रसिद्धमिदं श्रुत्यन्तरे पुराणादौ चेत्यर्थः । नासिक्यं नासिकास्थं प्राणं प्राणरूपमुद्गीथमुद्गीथकर्तारमुपासांचक्रिरे । हृदिन्द्रियस्थस्य प्राणस्योद्गीथमुद्गातुरुद्गीथदृष्ट्योपासनामकार्षुरित्यर्थः। दशविधा हि प्राणा भवन्ति । सर्वत्र पुरुषचैतन्यं व्याप्तम् । चैतन्यंव्याप्तत्वादेव च प्राणमुद्गीथकर्तृत्वेनोक्तम् । **तं ह** एवंरूपेण प्रकाशस्वभावेन्द्रियवृत्तिभिराश्रितमुपाश्रितं च प्राणप्राण**मसुराः** सन्मार्गानुगतेन्द्रियवृत्त्युत्कर्षमसहमानाः स्वाभाविक्य-

**स्तमः**प्रधाना इन्द्रियवृत्तयः प्रपाप्मनाऽऽसक्त्याऽभिमानेन, गर्धारूपेण वाऽधर्मेण **विविधुः** । तदिन्द्रियं गन्धग्रहणाभिमानिनं गन्धग्रहणासक्तं वा चक्रुरित्यर्थः । **तस्माद्धेतोस्तेन** पाप्मना हेतुनेत्यर्थः । स घ्राणप्राणदेव **उभयं** उभयात्मकं **सुरभि दुर्गन्धि च जिघ्रति** । सुन्दरगन्धं दुर्गन्धं च गृह्णातीत्यर्थः ।

ननु पापसंयुक्तत्वाद्धेतोर्घ्राणस्य दुर्गन्धग्राहकता युक्ता सुरभिग्राहकतात्वपापविद्धत्वात्कथमत्रोक्ता ? तेन चोभयशब्दप्रयोगोप्यनुचित इति चेदयं भावः—

विषयेष्वत्यासक्तिरभिमानं वा पाप्मा न तु शास्त्रानुसारिविषयग्रहणमात्रम् । 'धर्माविरुद्धो भूतेषु कामोस्मि भरतर्षभेति' स्मृतेः । यः पुरुषः सुरभिपदार्थेष्वपि गर्धामभिमानं वा करोति पाप्मयुक्त एव भवति सः । ततश्च गर्धाभिमाने एवोद्दिश्याऽत्र सुरभिग्रहणमुभयशब्दप्रयोगश्च कृत इत्यदोषः । अत एव वाजसनेयके 'यदेवेदमप्रतिरूपं जिघ्रति स एव स पाप्मा' इति श्रुतिः । यस्य यस्य घ्रातुरिदमिन्द्रियं यदाऽननुरूपं विप्रतिषिद्धं जिघ्रति गन्धं गृह्णाति स स एव घ्राता पापसंयुक्तो भवतीति तदर्थः । अननुरूपग्रहणं चात्र साभिमानं सगर्धं वा । एवं चात्राप्यननुरूपसुरभिग्रहणसंभावनयैव सुरभिग्रहणमुभयशब्दप्रयोगश्च ।

कुतोह्ययमुद्गातृत्वेनोक्तो घ्राणप्राणः सुरभिं दुर्गन्धं च गृह्णातीत्याशङ्कायां स्पष्टयति—**पाप्मना ह्येष विद्ध इति** ।

**हि** यतः कारणादेष सचैतन्यो घ्राणेन्द्रियप्राणः **पाप्मना**ऽभिमानेन गर्धया च **विद्धः** संसृष्ट इति । एवं परीक्ष्य परित्यक्त इति तात्पर्यम् । सैषा परीक्षा परित्यागश्चैष मुख्यप्राणोपासनापरिशोधनार्थैवेति ज्ञातव्यम् ॥ २ ॥

अपरपरीक्षणमाह—

**अथ ह वाचमुद्गीथमुपासांचक्रिरे ताᳬ हासुराः पाप्मना विविधुस्तस्मात्तयोभयं वदति सत्यं चानृतं च पाप्मना ह्येषा विद्धा ॥ ३ ॥**

**अथ हेत्यादि** । **अथ ह** तदनन्तरं पूर्वोक्ता देवा **वाचं** वागधिष्ठातृदेवतां तदिन्द्रियस्थं प्राणमुद्गीथोद्गातारमुद्गीथदृष्ट्योपासांचक्रिरे । **तं ह** तमप्यसुरा पूर्वोक्तेन्द्रियवृत्तयः पाप्मनाऽभिमानेन गर्धया च विविधुः संसृष्टं चक्रुः । **तस्मा**द्धेतोस्तद्देवता, **तया** पापविद्धया वाचोभयं सत्यमनृतं च वदति । **हि** यतः कारण**देषा** वाक् पाप्मना विद्धा । अत्राप्यननुरूपसत्यस्यैव ग्रहणं न तु विशुद्धसत्यस्य । तेन चोभयशब्दप्रयोगोपि न व्यर्थः । धर्मनाशफलकत्वं सत्यस्याननुरूपत्वम् ॥ ३ ॥

**अथ ह चक्षुरुद्गीथमुपासांचक्रिरे तद्धासुराः पाप्मना विविधुस्तस्मात्तेनोभयं**

**पश्यति दर्शनीयं चादर्शनीयं च पाप्मना ह्येतद्विद्धम् ॥ ४ ॥**

अथ ह चक्षुरित्यादि । पूर्ववत् । अत्राभिमानगर्धो-हेतुकं दर्शनीयग्रहणमुभयप्रयोगश्च ॥ ४ ॥

**अथ ह श्रोत्रमुद्गीथमुपासांचक्रिरे तद्धा-सुराः पाप्मना विविधुस्तस्मात्तेनोभयंꣳ शृणोति श्रवणीयं चाश्रवणीयं च पाप्मना ह्येतद्विद्धम् ॥ ५ ॥**

अथ ह श्रोत्रमित्यादि । पूर्ववत् । अत्राप्यभिमान-गर्धहेतुकं श्रवणीयग्रहणमुभयप्रयोगश्च ॥ ५ ॥

**अथ ह मन उद्गीथमुपासांचक्रिरे तद्धा-सुराः पाप्मना विविधुस्तस्मात्तेनोभयꣳ संकल्पयते संकल्पनीयं चासंकल्पनीयं च पाप्मना ह्येतद्विद्धम् ॥ ६ ॥**

अथ ह मन इत्यादि । पूर्ववत् । अत्राप्यभिमानग-र्धहेतुकं संकल्पनीयग्रहणमुभयशब्दश्च । एतेनानुक्ता अपि रसनत्वक्पाणिपादादयो देवा व्याख्याताः । तथा चोक्तं श्रुत्यन्तरे 'एवमु खल्वेता देवताः पाप्मभि'रित्यादि बृह-दारण्यके ॥ ६ ॥

एवं परीक्ष्योपासनाप्रधानविषयं मुख्यप्राणमाह—

**अथ ह य एवायं मुख्यः प्राणस्तमुद्गीथमुपासांचक्रिरे त ँ हासुरा ऋत्वा विदध्वंसुर्यथाश्मानमाखणमृत्वा विध्वंसेत ॥ ७ ॥**

**अथ हेति । अथ ह** तदनन्तरं, प्राणादिदेवान्परीक्ष्यासुरविद्धत्वात्तत्परित्यागानन्तरमित्यर्थः । पूर्वोक्ता देवाः, **य एव** वेदप्रसिद्धो**ऽयं** प्रत्यक्षे वर्तमानः श्वासरूपो लोकप्रसिद्धो मुखे भवो **मुख्यः प्राणो** देव उद्गीथोद्गाता, **तमुद्गीथ**मुद्गीथज्ञानेनोपासांचक्रिरे । प्राणो ह्युद्गीथोद्गाता । प्राणस्यैवोद्गानसामर्थ्यं नान्यस्य । तमेतं प्राणं सर्वे देवा उद्गीथं विज्ञायोपासनांचक्रुरित्यर्थः । उपासनार्थः पूर्वमुक्त एव । **तं ह** तमप्य**सुराः** परोत्कर्षासहिष्णवः पूर्वोक्ताः **ऋत्वा** प्राप्य विदध्वंसुः । आसुरत्ववेधनायासुराः प्राणमागताः किन्त्वागत्यापि तत्सामर्थ्येन तस्य हानिमकृत्वा स्वयमेव विध्वंसं प्रापुरित्यर्थः । तत्र दृष्टान्तमाह—**यथेति । यथाऽऽखणं,** आ ईषदपि टङ्कादिभिः खनितुमशक्यस्तमाखणं वज्रकल्प**मश्मानं** प्रस्तरं लोष्ठमिष्टका पांसुपिण्डो वा **ऋत्वा** प्राप्य तत्संयोगं लब्ध्वा, **विध्वंसेत** स्वयमेव विध्वंसं प्राप्नुयात्तथैतेऽप्यसुराः प्राणमाहात्म्यविनाशायागताः स्वयमेव विनेशु-

रित्यर्थः । 'यथाऽश्मानमृत्वा लोष्ठो विध्वंसेते'ति बृहदारण्यकश्रुतिदृष्टान्तेनात्राऽपि लोष्ठग्रहणम् ॥ ७ ॥

न केवलं मुख्यप्राणोपासनकर्तर्येवासुर्याक्रमणमकिञ्चित्करं किन्तु यः प्राणमेनमेवं वेत्ता तस्मिन्नप्यसुराक्रमणं न भवतीत्याह—

**एवं यथाऽश्मानमाखणमृत्वा विध्वंसत एव ँ हैव स विध्वꣳसत य एवंविदि पापं कामयते यश्चैनमभिदासति स एषोऽश्माखणः ॥ ८ ॥**

**एवमिति** । **एवं** एवंप्रकारेण प्राणोऽयं शुद्धिपरीक्षामुत्तीर्ण इत्युक्तमित्यर्थः । तथा च यः **खल्वेवंविदि** पूर्वोक्तप्रकारेण मुख्यप्राणमुद्गीथाभिन्नविदुषि **पाप**मयोग्यमाचरणं कामयते चिकीर्षति । किं च **यश्च** योऽपि जन **एन**मेतद्गुणकप्राणविद**मभिदासति** हिनस्ति ताडनादिकं वा करोति **स एव** जनो यथा येन प्रकारेणाखणं दृढतम**मश्मानमृत्वा** प्राप्य लोष्ठादिकमकिञ्चित्करं वस्तु **विध्वंसते विनश्य**त्येवं तेनैव प्रकारेण **ह** निश्चितं **स एव** सोऽपि स्वयं विध्वंसते विनश्यति । कुत इति चेत्**सएषोऽश्माखण** इति । यतः कारणात्स एव पूर्वोक्तगुणविशिष्टः प्राणवेत्ताऽश्माखण इव दृढतमोऽधृष्य इत्यर्थः ।

ननु नासिक्यमुख्यप्राणयोरुभयोर्वाय्वात्मकत्वे समानेऽपि तयोरेकः पाप्मना विद्धोऽपरः कथं न विद्ध इति शङ्क्यम् । स्थानकरणवैगुण्यावैगुण्ययोस्तत्र हेतुत्वात् । वर्तते हि घ्राणप्राणस्य दोषवत्स्थानकरणवैगुण्यम् । मुख्यप्राणस्य तु तदुभयं नास्ति । आसन्यस्य भगवतो बलवतः प्राणदेवतात्वात् । अश्विनोश्चाबलवतोर्घ्राणाधिष्ठातृत्वात् । दृश्यते हि खड्गादिषु स्थानकरणवैगुण्यावैगुण्यम् । यथा खलु वीरविदुषो हस्ते खड्गं फलं दर्शयति न तथाऽवीरस्याविदुषो हस्ते ॥ ८ ॥

न केवलमप्रधृष्यतामात्रगुणकोऽयं मुख्यः प्राणः किन्त्वस्मिन्नन्येऽपि भगवद्गुणा वर्तन्त इत्याह—

**नैवेतेन सुरभि न दुर्गन्धि विजानात्यपहतपाप्मा ह्येष तेन यदश्नाति यत्पिबति । तेनेतरान्प्राणानवति । एतमु एवाऽन्ततोऽवित्त्वोत्क्रामति व्याददात्येवान्तत इति ॥ ९ ॥**

**नैवेत्यादि** । मुख्यप्राणोऽयमसुरैरनाक्रान्त इत्यये**वैतेन** प्राणेन **नैव सुरभि** सुगन्धं **दुर्गन्धि** दुर्गन्धं च **विजानाति** परीक्षते । पुरुष इति शेषः । अपरं गुणमाह—**अपहतपाप्मा ह्येषः** । हि यतःकारणादेष प्राणोऽसुरैः पाप्मनाऽस्पृष्टस्तस्मादपहतोऽपगतो न वर्तते पाप्मा यस्मिन्सोऽपहतपाप्मा

तेन। न तु सतोऽपनयनं इति गम्यते। तेन च पूर्वत एवायं विशुद्ध इत्यर्थः। यथा भगवान्सर्वरक्षकस्तथाऽयमपि स्वपरिकररक्षक इति निरूपयति—**तेनेति**। **तेन** मुख्यप्राणेन जीवो यदन्नाद्य**श्नाति** यत्पेयादि **पिबति तेना**शनेन पानेन च न केवलमात्मानमेव बिभर्ति किन्त्वि**तरान्प्राणा**न्घ्राणादीन्द्रियस्थानुपलक्षणयेन्द्रियाण्य**प्यवति** रक्षति। मुख्याशितपीताभ्यामेवेतरे प्राणास्तानीन्द्रियाणि च रक्ष्यन्त इत्येव स्पष्टयति—**एतमित्यादि**। **एतं** मुख्यप्राणं तदशितपीतं **चान्ततो** मरणावस्थाया**मवित्वा**ऽलब्ध्वेतरः प्राणेन्द्रियसमुदाय **उत्क्रामति** प्रयाति। मरणावस्थायां हि मुख्यप्राणोऽशनपानादि मुञ्चति। ततश्च तदशनपानाभ्यां जीवन्तीतरे प्राणाः, जीवन्ति चेन्द्रियाणि। तदुभयमलब्ध्वोद्गच्छन्तीति लोकप्रत्यक्षमेतत्। तदुत्क्रमणलक्षणमेवोद्घाटयति—**व्याददात्येवान्त इति**। अन्ततो मरणसमये मुखविवारो भवत्येवेत्यर्थः। मुखविवार एवामुख्यप्राणानामन्नाद्यलाभादुत्क्रान्तौ लिङ्गम् ॥ ९ ॥

विशुद्ध्यपहतपाप्मत्वरक्षकत्वादिगुणविशिष्टमुख्यप्राणोद्गातृरूपोद्गीथोंकाराक्षरोपासनोक्ता। इदानीमांगिरसबार्हस्पत्यायास्यगुणत्रयप्रकाशनार्थमुपासनान्तरमाह—

**तꣳहाङ्गिरा उद्गीथमुपासां चक्र एतमु एवांङ्गिरसं मन्यतेऽङ्गानां यद्रसः ॥१०॥**

**तं हेति** । अङ्गिरोबृहस्पत्यायास्यनामानो वेदद्रष्टारः प्राणोद्गीथोपासका ऋषयः । प्राणश्चोद्गीथदृष्ट्योपास्यः । ततश्च 'प्राणो ह पिता प्राणो ह माता' इतिवदुपास्योपासकाऽभेददृष्ट्येव वर्णयति श्रुतिः । **तं** मुख्यं प्राणमङ्गिरा ऋषिरङ्गिरोगुणकमुद्गीथोंकाराक्षरमुपासांचक्रे । उ वितर्के । एवं हि तर्को यदेतमाङ्गिरसगुणविशिष्टं प्राणमेव तद्विद आङ्गिरसं मन्यन्तेऽवगच्छन्ति । यत् यस्मात्कारणात्प्राणोऽङ्गानां **रसो** जीवनप्रदः । अङ्गानामयमाङ्गी, आङ्गी चासौ रसश्चेत्याङ्गिरस इति व्युत्पत्याऽप्यभेद इव दृश्यते । प्राणो ह्यङ्गानां रस इव जीवनप्रद इत्याङ्गिरसः कथ्यते ॥ १० ॥

द्वितीयगुणमाह—

**तेन तꣳ हाऽऽयास्य उद्गीथमुपासांचक्र एतमु एवाऽऽयास्यं मन्यन्त आस्याद्यदयते ॥ १२ ॥**

**तेनेति** । **तेन** हेतुना **तं ह** प्राणमेवा**यास्य**स्तन्नामाऋषिरुद्गीथमुपासांचक्रे । पूर्ववत् । **एतमु एव** प्राणमेव विद्वांस आयास्यं मन्यन्ते । **यत्** यदयं प्राणोप्यास्यान्मुखादयते गच्छत्यागच्छति चेति । तथा च बलप्रदत्वाद्रक्षकत्वाज्जीवनप्रदत्वात्प्राणोपासनाऽवश्यमनुष्ठेयेति श्रुतितात्पर्यम् १२

न केवलमाङ्गिरसादय एवैतं प्राणमुपासांचक्रुरपरेपि प्रधाना विद्वांसस्तथा चक्रुरिति विशेषतः शिष्टसम्मतिं दर्शयति—

**तेन तꣳह बको दाल्भ्यो विदांचकार । स ह नैमिशीयानामुद्गाता बभूव स ह स्मैभ्यः कामानागायति ॥ १३ ॥**

**तेनेति** । येन कारणेनैते तमुपासन्त **तेन ह** तेनैव हेतुना **तं** प्राणमेतं दाल्भ्यस्यर्षेर्गोत्रजो **बको** नामर्षिर्यथोक्तगुणं प्राणं **विदांचकार** विज्ञातवान् । प्राणमुद्गीथत्वेनोपासांचक्र इत्यर्थः । तदुपासनया प्राप्तप्रधानाधिकारः **स ह** दाल्भ्य एव बकर्षिर्नैमिशीयानां नैमिशक्षेत्रस्थितानां याज्ञिकानां मध्य उद्गाता सामव्याख्याता बभूव । **स** बकर्षिः ह तेनैव सामर्थ्येनैभ्यः शौनकादिभ्यः कामानागायति सर्वमनोरथान्पूरयतीत्यर्थः । तत्कामाननतिक्रम्य भगवद्गुणगानं करोतीत्यर्थः । **स्मेति** पूर्वेतिहासं द्योतयति ॥ १३ ॥

इदानीमपि तस्य तथा सामर्थ्यं भवति योऽसावेतद्गुणमेतं प्राणमुद्गीथमुपास्त इत्याह—

**आगाता ह वै कामानां भवति य एतदेवं विद्वानक्षरमुद्गीथमुपास्त इत्यध्यात्मम् ॥ १४ ॥**

ह **वै** निश्चप्रचमिदं यत् यः खल्वन्योपि जन **एतत्**प्रकरणोक्तमोंकाराक्षरमुद्गीथप्राण**मेवं विद्वान्** पूर्वोक्तगुणैर्विशिष्टत्वेन विज्ञायोपास्ते स हि **कामानामागता** सर्वेषां सर्वमनोरथपूरयिताऽप्रतिबन्धं सामोद्गाता च भवतीत्यर्थः । **इति** एवं प्रकारेणाध्यात्मप्रकरणमुक्तम् । आत्मा शरीरं शरीरस्थितो जीवो वा तमधिकृत्योक्तं शास्त्रमध्यात्मम् । प्राणः सचैतन्य ओंकारोद्गीथः उपासितव्य इत्येतस्मिन्प्रकरण उक्तमित्येत्प्रकरणमध्यात्ममुच्यते तच्च समाप्तमित्यर्थः । कर्मानुगतोपासना कथिता । इतःपरखण्डेऽधिदैवतप्रकरणे ज्ञानानुगतोपासनावक्ष्यते ॥ १४ ॥

**इति श्रीदेवर्षिरमानाथसूरिकृतौ भगवद्धर्मबोधभाष्ये द्वितीयः खण्डः ।**

## अथ प्रथमाध्यायस्य तृतीयः खण्डः ।

कर्माङ्गमुपासनमुक्तं पूर्वखण्डे सम्प्रत्यस्मिन्खण्डे ज्ञानभक्त्यङ्गमादित्योपासनमुच्यते सर्वत्र ब्रह्मदृष्ट्यर्थं भक्त्यर्थं च—

**अथाधिदैवतं, य एवासौ तपति तमुद्गीथमुपासीतोद्यन्वा एष प्रजाभ्य उद्गायति उद्यंस्तमोभयमपहन्त्यपहन्ता ह वै भयस्य तमसो भवति य एवं वेद ॥ १ ॥**

अथेति । अथाऽध्यात्मकथनानन्तरमधिदैवतमुपासनमुच्यत इति शेषः । देवता भगवदङ्गानि तदन्तःस्थं चाऽधिकृत्योक्तं यत्प्रकरणं तदधिदैवतम् । सूर्यादयो देवा परब्रह्मणोऽङ्गानि । अङ्गत्वादेव च तद्रूपाणि । मूढमतयस्तेष्वन्यबुद्धिं कृत्वा प्रवर्तन्ते । सा च बुद्धिरेतेन शास्त्रेणापनीय सूर्यादयो ब्रह्माङ्गत्वाद्भगवद्रूपा भगवत्त्वेनोपास्या इत्युच्यते श्रुत्याऽनया ।

कथमिति चेदेवं—य एव प्रत्यक्षं दृश्यमानः प्रसिद्धोऽसावपरत्र लोके वर्तमानः सूर्यस्तपति प्रकाशते, तमेतं सूर्यमुद्गीथमुद्गीथदृष्ट्योपासीत । भगवन्तं यथा जपपूजनप्रह्वीभावादिना सत्करोति, तथाऽऽदित्यमपि तैरेव साधनैः सत्कुर्यादित्यर्थः । ननूद्गीथादित्ययोः किं साम्यं तत्राह—

उद्यन् उदयं गच्छन्नेष आदित्यः **प्रजाभ्य** उद्गायत्युपकरोति । 'अथात्मनेऽन्नमागायेदिति' श्रुत्योद्गातुरन्नार्थमागानं श्रूयते । तेन चोद्गाता यजमानस्योपकरोति तथाऽयमपि सूर्यः प्रत्यहमुदयं प्राप्तोऽन्नपाकादिना प्रजानामुपकरोतीत्येषोदय एवैतस्योद्गानमिति भावः । आदित्योद्गीथोपासनस्य फलमाह-**उद्यन्नुदयं** प्राप्तोऽसावादित्यस्तमो नैशमन्धकारं तदुद्भवं भयं **चापहन्ति** दूरीकरोति । न केवलं तदुपासिता एव किन्तु **य एव** योऽपि तमादित्य**मेवं** तमोभयनाशकत्वादिगुणकं **वेद** जानाति सोऽपि **ह वै** निश्चयेन प्रजानामात्मनश्च भयस्य संसारकृतस्य, तमसश्चाज्ञानस्यापहन्ता नाशको भवतीति महाफलमिदमादित्योद्गीथोपासनम् ॥ १ ॥

अध्यात्माधिदैवतप्राणादित्योपासनयोर्देहाकाशरूपस्थानभेदाद्भेद इव लक्ष्यते । तं भेदं निवारयन्ती श्रुतिर्द्वयोर्वस्तुत ऐक्यमिति निरूपयति—

**समान एवायं चासौ चोष्णोऽयमुष्णोऽसौ स्वर इतीममाचक्षते स्वर इति प्रत्यास्वर इत्यमुं तस्माद्वा एतमिमममुं चोद्गीथमुपासीत ॥ २ ॥**

**समान इति** । उ विचारनिश्चितोऽयं विषयो यदयं देहस्थः प्राणोऽसौ चाकाशे वर्तमानः सूर्यः, समानस्तुल्य

एव । पूर्वोक्त आध्यात्मिकः प्राणपदार्थोऽसावाधिदैवतं च सूर्यः द्वावपि तुल्यावित्यर्थः । सूर्येण प्राणः प्राणेन सूर्यश्च समान इति भावः । कथमिति चेत्—**अयं प्राण उष्णस्तै-जसः । असौ** च सूर्योऽप्युष्णस्तेजोनिधिरितिद्वयोर्न वस्तु-भेदः । नामभेदोपि नास्तीत्याह—इमं प्राणं स्वर इत्याचक्षते तद्विदः कथयन्ति । स्वरति गच्छतीति स्वरः । प्राणापा-नादिरूपेणात्र प्राणो हि देहाद्देहान्तरं च गच्छति । **अमुं** चादित्यमपि विद्वांसः प्रत्यास्वर इत्याचक्षते कथयन्ति । प्रत्यास्वरति प्रत्यागच्छतीति प्रत्यास्वरः । सूर्यो हि यत्रैवास्तं गच्छति तत्रैव पुनः प्रत्यागच्छतीति प्रत्यास्वरः कथ्यते । सूर्यस्य देवतात्वाद्विशेष एवायं न वस्तुभेदः । गमागमयो-र्गतिरूपत्वादेकताया उभयत्र वर्तमानत्वात् । तस्मात् प्राणा-दित्ययोर्गुणनामभ्यां समानत्वादेतं शरीरस्थमिमं प्राणममुं व्योम्नि वर्तमानमादित्यं चोद्गीथमुपासीत । तयोर्भगवद्दृष्ट्यो-पासनं युक्तमितिभावः ॥ २ ॥

प्रकारान्तरेणोपासनमुच्यते—

**अथ खलु व्यानमेवोद्गीथमुपासीत यद्वै प्राणिति स प्राणो यदपानिति सोऽपा-नोऽथ यः प्राणापानयोः सन्धिः स व्यानो यो व्यानः सा वाक् तस्मादप्रा-णन्ननपानन्वाचमभिव्याहरति ॥३॥**

**अथेति** । अथाऽनन्तरम् । भिन्नोऽयं प्रक्रम इत्यर्थः । व्यानोद्गीथोपासनायाः प्रस्तुतत्वात् । एतत्खण्डस्य प्रथमपर्यायेणाधिदैवतमादित्योपासनमुक्तम् । द्वितीयेन तेनाध्यात्माधिदैवतप्राणादित्ययोरैक्यम् । अनेन पुनःपर्यायेण प्राणस्यैव वृत्तिविशेषस्य व्यानस्योपासनमुच्यतेऽध्यात्माधिदैवतयोरैक्यद्योतनाय । **खलु** जिज्ञासायाम् । इदमत्र श्रुतित्रयेण विचार्यत इत्यर्थः । व्यानं प्राणवृत्तिविशेषमुद्गीथमुपासीत । व्यानस्य भगवद्दृष्ट्या यथानुरूपमुपासनं कर्तव्यमित्यर्थः । व्याननिरूपणार्थं प्राणापानयोः स्वरूपं निरूपयति—**यै** प्रत्यक्षेणेदं निश्चीयते यत्प्राणिति प्रकर्षेणानिति श्वासमन्तर्नयति स प्रसिद्धः प्राणः । यत् यच्चापानिति विरुद्धमनिति वायुं बहिर्निःसारयति सोऽपानः । **अथ** प्रतिज्ञैषा । निश्चय इत्यर्थः । प्राणापानयोर्मुखनासिकाभ्यां वायुग्रहणनिःसारणयोर्**यः संधिर्**यामध्यावस्था प्राणस्य वृत्तिविशेषः स व्यानः । यो हि व्यानः स एव वाक् । व्यानेन हि वाक् जन्यते यस्मात्तस्माल्लोकोऽ**प्राणन्**प्राणव्यापारमकुर्वन्न**नपानन्**नपानव्यापारमकुर्वन्न**भिव्याहरति** वदति । एतेन प्राणवृत्तिविशेषस्य व्यानस्याऽऽदित्यतौल्यमुक्तं भवति ॥३॥

वागृक्साम्नामुद्गीथत्वं निगमयति—

**या वाक्सर्क्तस्मादप्राणन्ननपानन्नृचम-भिव्याहरति यर्क्तत्साम तस्मादप्राणन्न-**

**नपानन्साम गायति यत्साम स उद्गी-**
**थस्तस्मादप्राणन्ननपानन्नुद्गायति ॥४॥**

**येति** । या वाक् सा ऋक् । ऋचां वाग्विशेषत्वात् । तां ऋचमपि प्राणापानव्यवहारमकुर्वन्व्यानेनैव व्याहरति । **या** च **ऋक्**, तदेव **साम** ऋचां गानम् । स्वरमात्रभेदात् । तत्सामादि तथैव प्राणापानव्यवहारमकुर्वन्व्यानेनैव व्याहरति । यत्साम तदेवोद्गीथः । यथा ओमित्युद्गीथ, उद्गीयते, तथा सामापि उद्गीयत इति तदुद्गीथः । उद्गीथमपि तथैवोद्गाता व्यानेनैवोद्गायति । तस्माद्वागादीन्युद्गीथः ॥ ४ ॥

वाचो व्याहरणं व्यानकार्यमेव न प्राणापानयोरित्युक्तम् । अन्यान्यपि सामर्थ्यसाध्यानि कार्याणि व्यानकार्याणीत्याह—

**अतो यान्यन्यानि वीर्यवन्ति कर्माणि**
**यथाग्नेर्मन्थनमाजेः सरणं दृढस्य धनुष**
**आयमनमप्रमाणन्ननपानंस्तानि करो-**
**त्येतस्य हेतोर्व्यानमेवोद्गीथमुपास्ते ॥५॥**

**अतो** व्याहरणरूपात्कार्याद्यान्यन्यान्यपराणि **वीर्य-वन्ति** सामर्थ्यसाध्यानि कर्माणि कार्याणि तान्यप्राणन्नन-पानन्करोति प्राणापानव्यवहारमकुर्वन्केवलव्यानेनैव करोति । प्राणवायोरन्तःकर्षणसमये न कर्तुं शक्नोति, न वा बहिर्निः-

सारणसमये कर्तुं शक्नोति । केवलं तु तयोर्मध्यावस्थायां व्यानाख्यायामेव विदधातीत्यर्थः । तानि कर्माण्येवाह—यथा अग्नेर्वैतानिकस्य वह्नेर्**मन्थनम**रणीतो निष्कानप्रयत्नः । **आजेः सरणं** पराजितस्य युद्धात्पलायनम् । किंवा युद्धार्थगमनम् । **दृढस्या**तिकठिनस्य **धनुषश्चापस्याऽऽयमनं** मौर्वीसन्धा-नादि । **एतस्य हेतोः** पूर्वोक्तस्य वीर्यवत्कर्मणः कारणा**द्व्या-नमेव** प्राणवृत्तिविशेषमेवोद्गीथमुद्गीथदृष्ट्योपासीत । विभू-तिरूपत्वात् । एतेन व्यानोपासनाया वीर्यवत्कर्मकरत्वं गुणो व्याख्यातः ॥ ५ ॥

भगवन्नामोपासनाया यत्फलं तदेव नामाक्षरोपासनायाः फलमिति दर्शयितुमुद्गीथावयवरूपतदक्षरोपासनां प्रस्तौति—

**अथ खलूद्गीथाक्षराण्युपासीतोद्गीथ इति प्राण एवोत्प्राणेन ह्युत्तिष्ठति वाग्गी-र्वाचो ह गिरः इत्याचक्षतेऽन्नं थमन्ने हीदꣳसर्वꣳस्थितम् ॥ ६ ॥**

**अथे**ति । अथेति भिन्नः प्रक्रमः । **खलु** पूर्वैर्विचारितोयं पन्था इति दर्शयति—**उद्गीथाक्षराण्यु**द्गीथात्मकभगवन्नाम-वर्णानुद्गीथ इत्येवोपासीत । भगवन्नाम्नीव तदक्षरेष्वपि भग-वद्बुद्धिं कुर्यादित्यर्थः । नाम्नैकदेशोपासनेऽपि नामोपासनमेव कृतं स्यात् । यथा भीमसेन इत्यत्र भीम इति । सत्यभामा

इत्यत्र भामा इति । तदक्षराणि स्वरूपनिर्देशपूर्वकं निर्दिशति प्राण **एवोत्** । उद्गीथशब्दस्य त्रयो भागाः—उत्, गीः, थम् । तेष्वाद्यो भाग उदिति प्राणस्वरूपम् । प्राणे यथा देहधारणसामर्थ्यं तथा भगवन्नामैकदेशेऽपि जानीयादित्यर्थः तदेव वदति-**हि** यतःसर्वोपिजनः प्राणेन भगवद्विभूतिरूपेणोत्तिष्ठति स्थितिं लभते । अप्राणाः किलावसीदन्तीतिभावः । **गीर्मध्यमो** भागो **वाक्** प्रसिद्धा वाणी । सापि विभूतिरूपेति । **ह** प्रसिद्धमिदं यद्विद्वांसो वाचो गिर इत्याचक्षते कथयन्ति । **थं** चान्तिमैकदेशः **सोऽप्यन्नम्** । अद्यते बुभुक्षाशमनार्थमुपयुज्यते तदन्नम् । **हि** यतःकारणा**दिदं सर्वं** पुरो दृश्यमाणं श्रूयमाणं च देवादिजगन्निखिलमन्ने स्थितम् । अन्नेनैव सर्वे लोका विधृतास्तिष्ठन्तीत्यर्थः । उदः प्राणेन, गिरो वाग्भिः, थस्याऽन्नेन साम्यमितिभावः । एतेन सर्वलोकधारणादिगुणकमुद्गीथाक्षरोपासनामिति फलितम् ॥ ६ ॥

न केवलं प्राणवागन्नेष्वेवोद्गीथाक्षरोपासनं कर्तव्यं किन्तु यत्रापि तदानुरूप्यं तत्रान्यत्रापि तत्सामान्यं द्रष्टव्यमित्याह—

**द्यौरेवोदन्तरिक्षं गीः पृथिवी थमादित्य एवोद्वायुर्गीरग्निस्थꣳसामवेद एवोद्यजुर्वेदो गीः ऋग्वेदस्थं दुग्धेऽस्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति य**

**एतान्येवं विद्वानुद्गीथाक्षराण्युपास्त उद्गीथ इति ॥ ७ ॥**

**द्यौरिति** । द्यौर्देवलोका एवोदुद्गीथादिभागः । उच्च-स्थानस्थितत्वात् । **अन्तरिक्षं** भूदिवोरन्तरालभाग आकाशवाच्य एव **गीरुद्गीथमध्यमभागः** । आकाशस्य सर्वलोकनिगिरणधर्मवत्त्वात् । **पृथिवी** प्रसिद्धो भूर्लोक एव **थमुद्गी**-थान्तिमभागः । सर्वेषां स्थानाद्धेतोः । किंच, आदित्यःप्रसिद्ध एवोत् । ऊर्ध्वस्थितत्वात् । वायुर्गीः । स्वकार्यस्याभ्यादे गिरणात् । अग्निस्थमन्तिमो भागः । यज्ञादिकर्मणः स्थानद इति । एवमेव, सामवेद एवोत्, उद्गीथादिः । उच्चैर्गायमानत्वात् । यजुर्वेदो गीरुद्गीथमध्यः । तेन यजुषा देवेभ्यो हविर्दानात् । ऋग्वेदस्थमुद्गीथान्तः । साम्नो गानरूपस्यर्क्ष्वेव स्थितत्वात् । एवमन्यत्रापि विभुतिषूद्गीथसाम्यमूह्यम् । सम्प्रत्युद्गीथाक्षरोपासनफलमाह—**यस्त्र**यीवेत्ता जन एतानि द्युलोकान्तरिक्षादीन्**येवं** भगवद्गुणदर्शी **विद्वा**ञ्जानन्**नुद्गीथ इति** भगवानित्युद्गीथाक्षराण्युदित्यादीन्युपास्ते, **अस्मै** भगवद्गुणसाम्येन भगवद्दृष्ट्योद्गीथाक्षरोपासकाय **वाक्** सरस्वती **दोहं** दुग्धामृतमिव प्रवाहं **दुग्धे** संपादयति । कोसौ दोह इति चेदाह—**यो वाचो दोह इति** । स्वाधीनः शास्त्राक्षरोच्चारार्थतात्पर्याद्यवगमो नाम वाचो दोहः । स हि तस्य भवतीत्यर्थः । एवमुद्गीथाक्षरोपासकः स्वयं शास्त्राक्षराणि

पदपदार्थावगमपूर्वकं शुद्धमुच्चारयति । अर्थतात्पर्यं चानुसन्धत्त इति भावः । वाक् स्वात्मना तं वृणुत इत्युक्तं भवति । न केवलमेतावदेव फलं किन्त्वयम**न्नवान्**बहुव्रीहि**रन्नादो**ऽन्नभोगक्षमश्च भवति ॥ ७ ॥

वाग्वैभवफलमुपासनमुपदिश्य फलसमृद्धिप्रकारकज्ञानमिदानीं निर्दिश्यते—

**अथ खल्वाशीःसमृद्धिरुपसरणानीत्युपासीत येन साम्ना स्तोष्यन्स्यात्तत्सामोपधावेत् ॥ ८ ॥**

**अथेति** । **अथा**नन्तरम् । काम्योपासनाद्योतकं **खल्वि**त्यव्ययम् । **आशिःसमृद्धि**र्मनोरथपूर्तिवैभवं येन प्रकारेण भवति स प्रकार उच्यत इत्यर्थः । **उपसरणानि** प्राप्तव्यानि ध्येयानि **इति** एवं वक्ष्यमाणेन प्रकारेणो**पासीत** । सत्कुर्वीतेत्यर्थः । तं प्रकारमेवाह—**येन साम्ना** येन गानविशेषेण **स्तोष्यन्**स्तुतिं कुर्वन् भवति स **तत्सामोपधावेत्** । अस्य साम्नः कोत्पत्तिः किं छन्दः को वाधिष्ठाता देव इत्यादि विचारयेत् । विचारपूर्वकं स्तुतिरूपसाम्नश्छन्दोदेवतोत्पत्त्यादिज्ञानमेवाशीःसमृद्धिप्रकारज्ञानमित्यर्थः ॥ ८ ॥

**यस्यामृचि तामृचं यदार्षेयं तमृषिं यां**

**देवतामभिष्टोष्यन्स्यात्तां देवतामुपधावेत् ॥ ९ ॥**

**यस्यामिति । यस्यां** यत्प्रकारिकायां **ऋचि** मंत्रविशेषे स्तुतिविषयस्तत्साम **स्यात्तामृचमुपधावेत** । अस्या ऋचः किं छन्दः का देवता का वोत्पत्तिरित्यादि चिन्तयेदित्यर्थः । **यदार्षेयं** येनर्षिणा स्मृतं, तत्साम, तमृषिमुपधावेत् । किंगोत्रः किंस्वरूपोऽसावित्यादि चिन्तयेत् । **यां** विष्ण्वादिदेवतामधिष्ठात्री**मभिष्टोष्यन्**स्तुतिं कुर्वन्**स्यात्तां देवता**मुपधावेत् । एषा किं स्वरूपेत्यादि चिन्तयेत् ।

**येन च्छन्दसा स्तोष्यन्स्यात्तच्छन्द उपधावेद्येन स्तोमेन स्तोष्यमाणः स्यात्तꣳ स्तोममुपधावेत् ॥ १० ॥**

**येनेति । येन** यत्प्रकारकेण **च्छन्दसा** गायत्र्यानुष्टुबादिना **स्तोष्यन्**स्तुतिं कुर्वन्**स्यात्तच्छन्द** उपधावेदक्षरमात्राविरामदेवताफलादिना चिन्तयेत् । **येन स्तोमेन** त्रिवृत्पञ्चदशादिप्रकारकेण मंत्रसमूहेन स्तोष्यमाणः स्यात्तं स्तोममुपधावेत् । फलस्य कर्तृगामित्वादात्मनेपदम् ॥ १० ॥

**यां दिशमभिष्टोष्यन्स्यात्तां दिशमुपधावेत् ॥ ११ ॥**

**यामिति । यां** स्वस्थितिकां देवाधिष्ठितां च दिशम-भिष्टोष्योद्देशपूर्वकं स्तुतिं **कुर्वन्स्यात्तां** पूर्वादिकां दिशमु-पधावेदिन्द्राद्यधिष्ठातृभिः सह चिन्तयेत् ॥ ११ ॥

**आत्मानमन्तत उपसृत्य स्तुवीत कामं ध्यायन्नप्रमत्तोऽभ्याशो ह यदस्मै स कामः समृद्ध्येत यत्कामः स्तुवीतेति यत्कामः स्तुवीतेति ॥ १२ ॥**

**इति छान्दोग्ये प्रथमस्य तृतीयः खण्डः ।**

**आत्मानमिति । अन्ततः** सर्वान्त **उपसृत्य** वर्णनाम-गोत्राद्युच्चार्य**आत्मानं** कर्तृस्वरूपं **स्तुवीत** स्तुतिपूर्वकमुपधा-वेत । **कामं** निर्भरं किंवा स्वमनोरथाऽनुकूलं पूर्वोक्तं सर्वं **ध्यायश्चिन्तयन्नप्रमत्तः** स्वरोष्मव्यञ्जनह्रस्वदीर्घादिष्वनव-धानमकुर्वंस्स्तुवीत । सर्वं पूर्वोक्तमात्मानं चैवं प्रकारेणोपधा-वेदित्यर्थः । **ह** निश्चयेना**भ्याशः** सत्वरमेवायं **यत्कामो,** यः कामो यस्य सः, यां कामनां मनसि निधाय स्तुवीत स्तुतिं कुर्यात्तस्य स काम: स मनोरथः **समृध्येत** समृद्धो भवति । द्विरुक्तिरादरद्योतनार्था । इति शब्दः खण्डसमाप्त्यर्थः ॥१२॥

**इतिश्रीदेवर्षिरमानाथसूरिकृतौ भगवद्धर्मबोधभाष्ये प्रथमाध्यायस्य तृतीयः खण्डः ॥**

## अथ चतुर्थः खण्डः ।

विविधा उपासना उक्ताः । वक्ष्यन्ते चाग्रे । तासां सर्वासामपि न स्वरूपे भेदः किन्तु प्रयोग एव भेद इति दर्शयितुं पूर्वोक्तं स्मारयति । अयं भावः—उद्गीथाक्षरोपासनं ह्येकं तस्यैव किंचित्साधनफलभेदतो भेदो भवतीति प्रयोगभेद एव न स्वरूपभेदः । यथा च कर्मणि काम्यनित्ययोः साधनफलभेदेन प्रयोगे भेदो न तु स्वरूपे । यथा वा विभिन्नशाखास्वेकमेव कर्मोच्यते किन्तु किञ्चिद्भेदतः । स च भेदः प्रयोग एव न स्वरूपे । तथैवोद्गीथाक्षरोपासनेपि साधनफलभेदेन प्रयोग एव भेदो न स्वरूप इति प्रकाशयितुं पुनरपि प्रथमखण्डस्थां प्रथमामेव श्रुतिमाह—

**ओमित्येतदक्षरमुद्गीथमुपासीतोमिति ह्युद्गायति तस्योपव्याख्यानम् ॥ १ ॥**

**ओमित्यादि** । व्याख्या पूर्वमुक्ता । ओमित्यक्षरं ब्रह्म । उद्गीथश्च परं ब्रह्म । परत्वं तत्र तदपेक्षया सर्वापेक्षया च । यथोक्तं गीतोपनिषत्सु 'यस्मात्क्षरमतीतोहमक्षरादपि चोत्तमे' त्यादि । मितानन्दमक्षरं ब्रह्म अमेयानन्दं परं ब्रह्म । 'स एको ब्रह्मण आनन्दः' इति, 'यतो वाचो निवर्तन्ते'इति च श्रुतिद्वयेन द्वयोर्ब्रह्मणोर्मेयाऽमेयानन्दत्वेन पृथङ्निरूपणात् ।

ननु शुद्धाद्वैते द्वे ब्रह्मणीति विरुद्धमिव प्रतिभाति ? नैष-दोषः । न हि वास्तवं स्वरूपद्वैतम् । किन्त्वैच्छिकमेतत् । वास्तवं तु स्वरूपाद्वैतमेव । एकमेव परं ब्रह्म स्वेच्छया कार्यान्तरायाऽक्षरब्रह्मात्मना भवतीति । सृष्ट्यवस्थायां परं ब्रह्मैवाक्षरात्मना भवति । 'आनन्दं ब्रह्म' 'आनन्दं ब्रह्मणो विद्वानि'त्येताभ्यां श्रुतिभ्यां परब्रह्मणि स्वरूपभूतो धर्मभूतश्चानन्दोऽस्तीत्युक्तम् । तेजोमयः सूर्यः, सूर्यस्य तेज, इत्यत्र यथा सूर्ये स्वरूपभूतं धर्मभूतं च तेजो लक्ष्यते तथा परब्रह्मण्युभयविध आनन्द इति मन्तव्यम् । 'स सर्वं भवति' इतिश्रुत्या सृष्टिकार्याय स्वेच्छया स परमात्मैव स्वधर्मभूतमानन्दं किंचिदिव तिरोभाव्येवाक्षररूपतां गृह्णातीत्यद्वैतमेव वास्तवम् । तमैच्छिकभेदमुद्दिश्योमित्यक्षरनाम । अभेददृष्टयोद्गीथ शब्दोपि तत्परो भवति क्वचित् । उद्गीथ इति च परं ब्रह्म नाम । श्रुतिश्चेयं द्वयोरोंकारोद्गीथयोरभेदेनोपासनं विधत्ते **ॐमित्येतदक्षरमुद्गीथमुपासीतेति** । इयमुपासनैका प्रधाना च । नानाश्चान्याः । अस्या एवान्याः प्रयोगान्तरमित्याह—**तस्योपव्याख्यानमिति** । **तस्योद्गीथस्यैवान्यत्प्राणादि** तदुपासनान्तरञ्चोपव्याख्यानमुपदेशान्तरमित्यर्थः ॥ १ ॥

अमृताभयफलिकां ज्ञानभक्तिसहितामुद्गीथाक्षरोपासनां प्रपञ्चयितुं तत्पूर्वं कर्मरूपामुपासनामाह—

## देवा वै मृत्योर्बिभ्यतस्त्रयीं विद्यां प्रवि-

**शꣳस्ते छन्दोभिरच्छादयन्यदेभिरच्छा-
दयꣳस्तच्छन्दसां छन्दस्त्वम् ॥ २ ॥**

**देवा इति** । **देवा** दीव्यन्ति सत्वेन प्रकाशन्ते ते सात्त्विकाः, केवलवैदिककर्मपरा ज्ञानभक्तिसहितकर्मपराश्चोभये जीवाः, **मृत्योर्**जन्ममरणादिलक्षणात्संसारा**द्बिभ्यतो** भयं गच्छन्त**स्त्रयीं** वेदप्रतिपादितां **विद्यां** कर्मरूपामुपासनां **प्राविशन्** । वैदिककर्मतत्परा अभूवन्नित्यर्थः । 'मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये' इति भगवद्वचनाद्ये केचन सात्विकास्ते भगवदिच्छया संसाररूपमृत्युं विजेतुकामाःप्रथमोपायं कर्मैवाऽऽश्रितवन्तः । **ते** पूर्वोक्ता देवा मृत्युव्याकुला यथातथं **छन्दोभिर**न्यत्रविनियुक्तैर्नियते कर्मण्यविनियुक्तै रपि मन्त्रैरात्मान**मच्छादयन्**नगोपायन् । व्याकुलो ह्यनुपायमप्युपायबुद्ध्या स्वीकरोति, तद्वद्देवैरपि सकाममेव कर्माश्रितमित्यर्थः । इदमत्रोक्तं भवति—पूर्वकाण्डे हि मुक्त्यर्थमात्मसुखार्थं वा पंचयज्ञाःकर्मरूपा उक्ताः । ते च भगवतः पंचावयवाः । उत्तरकाण्ड चोपनिषत्सु तत्त्वात्मभगवज्ज्ञानरूपः षष्ठः शिरोऽवयवो वर्णितः । तथा चौपनिषद्ज्ञानभक्तिसाहितपञ्चयज्ञात्मकेन कर्मणा भगवता भगवत्कामनयानुष्ठितेन जनः क्रममुक्तिं लभते । त एव यज्ञा यदि ज्ञानादिविरहिता निष्कामनया कृतास्तर्ह्यात्मसुखं प्रयच्छन्ति । त एव यज्ञा यदि ज्ञानादिरहिताः कामनया कृतास्तर्हि लोकसुखं प्रयच्छन्ति । सर्वत्र हि प्रयोगभेद

एव न कर्मभेदः । लोकसुखं हि मृत्युग्रस्तमेव । केवलं तु भौमसुखाद्विलक्षणं, चिरं च सुखमनुभूय मृत्युग्रासः । एषा हि छादना । छादनं हि मृत्योः सकाशादात्मनो गोपनमात्रं नतु मृत्योः सर्वथा निरासः । यथोक्तं गीतोपनिषत्सु 'त्रैविद्या मां सोमपाः' इति । 'एवं त्रयीधर्ममनुप्रपन्ना गतागतं कामकामा लभन्ते' इति च श्लोकद्वयेन नवमाध्याये । तदेतत्सर्वमनया श्रुत्योच्यते 'ते छन्दोभिरच्छादयन्निति' । ते छन्दोभिर्मन्त्रैस्तदुक्तकर्मणा चात्मानं मृत्योः सकाशादच्छादयन्नेव नतु मृत्युं सर्वथा निरकासयन्नपीत्यर्थः । 'अच्छादय'न्नित्यनेनैव पदेन ज्ञायते यद्देवा यथायथमनियतमेव कर्माऽकुर्वन्न नियतम् । अन्यथा वक्ष्यमाणं मृत्युदर्शनं कथमाप्नुयुः । छादनादेवच्छन्दसामापाततः प्रतीयमानोऽर्थश्छन्द इति नाम चेत्याह–**यदेभिरिति । यत्** यस्मात्कारणाद्देवा आत्मान**मेभि**र्मन्त्रैस्तदुक्तैः कर्मभिश्चाच्छादयन्नगोपायंस्तत्तेनैव कारणेन छन्दसां मन्त्राणां **छन्दस्त्वं** छन्द इति नामेति । २ ।

ज्ञानभक्तिरहितेन कर्मणा केवलेन संसारतरणं न भवतीति श्रुतिराह—

**तानु तत्र मृत्यूर्यथा मत्स्यमुदके परिपश्येदेवं पर्यपश्यदृचि साम्नि यजुषि । ते नु वित्त्वोर्ध्वा ऋचःसाम्नो यजुषः स्वरमेव प्राविशन् ॥ ३ ॥**

**तान्विति** । उत्तरं । देवाः कृतकर्माणोपि मृत्युदर्शनं प्रापुस्तस्मात्तर्क्यते यत्तत्कृतं कर्म केवलं स्यान्न तु ज्ञानभक्तिसहितमित्यर्थः । अत एव **तान्** देवान्**मृत्युः** संसाराधिष्ठातृदेवता, **ऋचि** ऋक्साध्ये कर्मणि, **साम्नि** सामसाध्ये कर्मणि, यजुषि यजुःसाध्ये कर्मणि च **पर्यपश्यद**भितो ज्ञातवान् । मृत्युर्देवान्कमिव दृष्टवानित्यत्र दृष्टान्तमाह—**यथा मत्स्यमुदक इति** । दाशो **यथा** नातिगभीर **उदके** जले **मत्स्यं** पश्येत्तथा देवान्मृत्युरिति । त्रयीनिर्वर्तितं केवलं कर्म कुर्वतो देवान्मृत्युर्विज्ञाय पर्यग्रहीदित्यर्थः । **ते** कृतकर्माणः कथंचिद्विशुद्धहृदया देवा, **नु**रप्यर्थे देवा अपीत्यर्थः । यथा मृत्युस्तान्ज्ञातवांस्तथा तेऽपीत्यर्थः । **विश्वा** विदित्वा, वयं मृत्यु परिगृहीता इति विज्ञायेत्यर्थः । **ऋचो** ऋग्वेदात्तत्साध्यात्कर्मणोपि, **साम्नः** सामवेदात्सामसाध्यात्कर्मणोऽपि यजुषो यजुर्वेदात्तत्साध्यात्कर्मणोऽप्यू**र्ध्वा** श्रेष्ठस्थानस्थितं शिरोभूतं **स्वरमेव** पूर्वोक्तरीत्योंकारमुद्गीथाक्षरस्वरूपमेव प्राविशन्नाश्रितवन्तः। ओंकारोपासनपरा बभूवुरित्यर्थः । अयमाशयः—पंचयज्ञादिकं केवलं कर्म न मृत्युतरणायालमिति ज्ञात्वा देवा ओंकारोपासनपरा ज्ञानभक्तिसहितधर्मपरा वभूवुर्मृत्युतरणायेति ज्ञायते । यतो हि अक्षरोद्गीथोंकारोपासनं ज्ञानभक्तिरूपम् ॥ ३ ॥

उद्गीथाक्षरोपासनया ते मृत्युमुत्तरुरित्याह—

**यदा वा ऋचमाप्नोत्योमित्येवातिस्वर-**

**त्येव१ँ सामैवं यजुरेष उ स्वरो यदेतदक्ष-रमेतदमृतमभयं तत्प्रविश्य देवा अमृता अभया अभवन् ॥ ४ ॥**

**यदेति** । **यदा** यस्यामवस्थायाम्**ऋच**मृग्वेदं तत्साध्यं कर्म चाप्नोत्यध्येत्यनुतिष्ठति चैव, **तदोमित्येन** ओंकाराक्षरमुच्चार्यैवा**तिस्वरत्येव** वदति चानुष्ठानं च करोत्येव । यो हि जनो मृत्युतरणाय ऋक्सामयजुर्वेदानध्येति तत्साध्यानि कर्माणि चानुतिष्ठति स स एव तत्पूर्वमोकारमुच्चार्यैव वेदोच्चारणं तत्कर्मानुष्ठानं च करोतीत्याशयः । एवं **साम** तद्वेदस्तत्साध्यं कर्म च, यजुस्तद्वेदस्तत्साध्यं कर्म चाध्येत्यनुतिष्ठति च तदोंकारमुच्चार्यैव सर्वं करोतीत्यर्थः । **एष उ** अयमोकारोऽपि **स्वरः** सूर्यादिवत्स्वरशब्दवाच्य उदात्तादिसर्वधर्मवानस्ति । **यत्** यस्मात्कारणा**देतदेष** ओंकारोऽ**क्षर**मक्षरस्वरूपं तस्मा**देतदमृतं** मृत्युरहितमत एवा**भयं** भयरहितम् । **तद**मृताभयगुणकमोकाराक्षरोद्गीथं **प्रविश्या**श्रित्य **देवाः** पूर्वोक्ता **अमृता** मृत्युरहिता **अभया** भयरहिताश्च**ाभवन्** । ओंमित्यक्षरोद्गीथोपासनया मृत्युलक्षणं संसारमुत्तेरुरित्यर्थः ॥ ४ ॥

देववदन्योप्येवं भवतीत्याह—

**स य एतदेवं विद्वानक्षरं प्रणौत्येतदे-**

**वाक्षरꣳ स्वरममृतमभयं प्रविशति तत्प्रविश्य यदमृता देवास्तदमृतो भवति॥५॥**

इति प्रथमाध्याये चतुर्थः खण्डः ।

**स य इति** योऽन्योप्येदक्षरमोकाराक्षरोद्गीथमेवममृताभयरूपप्रकारेण विद्वाञ्जानन्प्रणौति स्तुतिध्यानादिनोपास्ते, सोऽपि यथा देवास्तदक्षरे प्रविश्यामृता अभयाऽभवंस्तथा स्वरशब्दवाच्यं तमाश्रित्यामृतोऽभयश्च भवति ॥ ५ ॥

इति देवर्षिरमानाथसूरिकृते भगवद्धर्मबोधभाष्ये
प्रथमाध्याये चतुर्थः खण्डः ।

## अथ पञ्चमः खण्डः ।

अधिदैवाध्यात्मनोरादित्यप्राणयोरुद्गीथत्वेनोपासना पूर्वमुक्ता । सम्प्रति तामेवोभयविधामेकीकृत्य पुनरतिदिशति द्वयोरेकत्वद्योतनाय—

**अथ खलु य उद्गीथः स प्रणवो यः प्रणवः स उद्गीथ इत्यसौ वा आदित्य उद्गीथ एष प्रणव ओमिति ह्येष स्वरन्नेति ॥१॥**

**अथेति** । अथेदानीं यः प्रसिद्ध एवोद्गीथशब्दवाच्यः स एवाऽपरत्रवेदस्थले प्रणवशब्दवाच्यः । प्रणूयते स्तूयतेऽसौ प्रणवः । उद्उच्चैर्गीयते स्तूयतेऽसावुद्गीथ इति द्वयोर्नाम्नि साम्यम् । वस्तु स्वरूपे च साम्यं द्वयोः सच्चिदानन्दरूपत्वात् । यश्च प्रणवः स एवोद्गीथोऽपरत्र शाखासु प्रसिद्धः । द्वयोर्वस्तुत एकत्वात् । ओंकारः प्रणवः सोपि भगवन्नामत्वाद्भगवद्रूप एव । भगवतोऽनेकरूपत्वात् । 'अनन्तं ब्रह्मे'ति श्रुत्या, 'अनेकरूपरूपाय विष्णवे प्रभविष्णव' इति स्मृत्या च भगवतोऽनन्तरूपकत्वकथनात् । उद्गीथप्रणवावादित्ये समाहरति—**इत्यीति** । इति एवंप्रकारेण प्रणवोद्गीथरूप आदित्य इत्यर्थः । तदेव स्पष्टयति—**असौ वेति** । असावन्तरिक्षे वर्तमान आदित्य आधिदैविक **उद्गीथ** उद्गीथस्वरूपः । **एषः**

अयमेव प्रणव ओंकार आध्यात्मिकोऽक्षरस्वरूपः । आधिदैविकाध्यात्मिकयोरैक्यमेव वास्तवमित्यर्थः । यथोक्तं समाधिभाषायां 'आध्यात्मिकश्च यः प्रोक्तः सोऽसावेवाधिदैविक' इति । कस्मादेवमितिचेत्—हि यस्मात्कारणादेव आदित्य '**ओमिति** कर्माङ्गां स्वरन्नुच्चारयन्नेति प्रत्यहमागच्छति । अत एवान्तराधिकरण आदित्योऽधिदैव इति साधितं भगवता बादरायणेन । तथा च मण्डलान्तर्वर्ती सूर्यो धर्मी आदिदैविकः । तत्प्रकाशशक्तिस्तदभिमानी पुरुष आध्यात्मिकः । तत्तेजःपदवाच्यः प्रकाश आधिभौतिकः । एवं नियमनादिव्यवहारसाधनायैच्छिके भेदे सत्यपि वस्तुगत्या त्वैक्यमेव । त्रयाणां सच्चिदानन्दब्रह्मरूपत्वात् । आदित्यो धर्मी प्रकटानन्दरूपः । मण्डलाभिमानी पुरुषश्चित्प्रधानः । तेजोमण्डलं सत्प्रधानम् ॥ १ ॥

एवमस्यां श्रुतौ शब्दान्तरैर्वचनभङ्गयन्तरेणाध्यात्मिकाधिदैविकयोरैक्यमुक्तम् । इदानीं सूर्यरश्मयः सूर्यरूपा एव तत्प्रकाशत्वात्तदभिन्नत्वात् । तथा च सूर्यस्येव रश्मीनामपि सत्कारस्तदुपासनया कर्तव्य इत्याह—

**एतमु एवाहमभ्यगासिषं तस्मान्मम त्वमेकोऽसीति ह कौषीतकिः पुत्रमुवाच रश्मीꣳस्त्वं पर्यावर्तयाद्बहवो वै ते भविष्यन्तीत्यधिदैवतम् ॥ २ ॥**

**एतमु** इत्यादि । उ, तर्कयाम्येवं **यदहं** कौषीतकिस्त्व- त्पिता **एवं** प्रणवोद्गीथैक्यंप्रकारेणादित्यमधिदैव**मभ्यगासिषं** स्तुतिगानध्यानादिनोपाचरम् । आदित्य एवोद्गीथप्रणवरूपो न रश्मय इत्यहं तमेव तथोपासांचक्र इत्यर्थः । तस्मात्तत्कारणा- देव मम त्वमेक एव पुत्रोसि । एकपुत्रता हि हीनामिव फलम् । मया हि किञ्चित्पृथक्कृत्य देव उपासित इति तत्फलमपि हीन- मिव जातम् । तेन सर्वं भगवानिति ज्ञात्वैवोपासना कर्तव्ये- त्युक्तं भवति । अतएव श्रुत्यन्तरे '**तज्जलानिति शान्त उपासीते**'त्युपदेशः । **इति** एवं प्रकारेण कौषीतकिस्तन्ना- मर्षिः **पुत्रं** स्वपुत्रमुवाच । **ह** ऐतिह्ये । तेन पुरातनोऽयमिति- हास इत्यर्थः । सर्वैक्यभावनयोपासनायां कृतायामुत्तमं फलं भवतीति सूचयति-**रश्मीनिति** । हे पुत्रेदानीं त्वं **रश्मी-** न्सूर्यकिरणान्प्रकाशरूपान्**पर्यावर्तयात्**पर्यावर्तयोपासस्वेत्यर्थः । किं तेन स्यादिति चेत्-**वै** निश्चयेन ते तव **बहवो** ऽनेके पुत्रा भविष्यन्ति । त्वमुत्तमं फलमाप्स्यसीति भावः । इत्येवं प्रकारे- णाधिदैवतं प्रकरणम् । अधिदैवतविषये यत्किंचिदस्माभिर्व- क्तव्यं तदुक्तमित्यर्थः ॥ २ ॥

अध्यात्मेऽप्येवमैक्यभावनयोपासनादुत्तमं फलं भवती- त्याह—

**अथाध्यात्मं य एवायं मुख्यः प्राणस्त- मुद्गीथमुपासीतोमिति ह्येष स्वरन्नेति ॥३॥**

**अथेति** । **अथा**धिदैवानन्तर**मध्यात्म**मध्यात्मविषयकं किञ्चिदुच्यत इत्यर्थः । **य एवाय**मुपासनया परीक्षितः सर्व-प्रत्यक्षो **मुख्यः प्राणस्तमुद्गीथ**मुद्गीथत्वेनोपासीत । मुख्य-प्राणस्य भगवद्दृष्ट्योपासना कर्तव्येत्यर्थः । पूर्वमादित्यप्रणवो-द्गीथानामैक्यमुपपादितमिदानीं मुख्यप्राणस्योद्गीथत्वेनोपासना कर्तव्येति वदन्ती श्रुतिरध्यात्माधिदैवतयोरैक्यमेवार्थान्तरेण वदति । कथमसौ प्राण उद्गीथ इति चेत्—**एष** प्राण, **ओमिति स्वरन्नु**च्चारय**न्नेवेति** गच्छति । गमनं करोतीत्यर्थः । **हि** निश्चि-तमेतदित्यर्थः । प्राणवायोराकर्षणसमये हि प्राण ओमित्यु-च्चारयति । तदुच्चारणं यद्यपि बहिःश्रुतिपथं नायाति तथापि समवहितेनात्मना स्वेन श्रूयत एवेति तद्विदः प्रमाणम् । तेन यथाऽऽदित्य 'ओमिति' कर्मकरणाज्ञां दिशन्नेवागच्छति प्राणोपि तथैवोमिति कर्मकरणाज्ञां प्रयच्छन्नेवागच्छतीति द्वयो-राध्यात्मिकाधिदैविकयोरैक्यमुक्तं भवति । नाऽत्र बहुपुत्रव-त्त्वमेवोद्गीथप्रणवादित्योपासनासहकृतस्य प्राणोपासनायोगसह कृतस्य च कर्मणः फलं दित्सितं श्रुत्या, किन्तु भेददृष्ट्या कृतं कर्म हीनफलं भवत्युत्तमफलदं तु भगवदभेददृष्ट्या कृतं कर्म भवतीत्येवाशयः प्रकाश्यते । तेनैकमेव किञ्चित्साधनभेदात्कर्म यथाकाममनन्तफलदं भवतीति ज्ञापितं भवति । ब्रह्मकामं तु कर्म ब्रह्मफलं भवतीत्यपि च । ततश्च प्रयोगभेदएव न कर्मभेद इत्यपि ज्ञातव्यम् ॥ ३ ॥

अध्यात्मोपासनायामपि सर्वाभेददृष्ट्यैवोपास्य उपासितश्चे-दुत्तमं फलं प्रयच्छति न तु भेददृष्ट्येत्याह—

**एतमु एवाहमभ्यगासिषं तस्मान्मम त्वमेकोऽसीति ह कौषीतकिः पुत्रमुवाच प्राणाꣳस्त्वं भूमानमभि गायताद्बहवो मे भविष्यन्तीति ॥ ४ ॥**

**एतमु** इत्यादि । **एतमु** पूर्वोक्तं प्रसिद्धं प्राणमेव केवलं नतूद्गीथादिसहकृत**महमभ्यगासिषं** प्राणायामादिनो-पाचरम् । **तस्मा**त्केवलकर्मरूपप्राणोपासना**न्मम त्वमेक** एव **पुत्रोसि** जातोसि । अवीर्यवता तेनोपासनेनेदमेकपुत्रो-त्पत्तिरूपं हीनं फलं जातमितिभावः । तेन ज्ञानभक्तिरहितेन योगादिसाधनेनापि मुक्त्याद्युत्तमं फलं न भवतीत्युक्तं भवति । **इति** एवं प्रकारेण **कौषीतकिः पुत्रं** स्वपुत्रमुवाच कथित-वान् । न केवलमियदेव किन्तु हे पुत्र **त्वं** त्विदानीं **प्राणा-न्भूमानं** भगवन्त**मभिगायता**दुपाचर । मुख्यप्राणा भग-वत्स्वरूपा इत्येव दृष्ट्या तान्पर्याचरेत्यर्थः । किं फलं मनसि निधाय तथाकरोमीति चेत्—**बहवो मे** पुत्रा **भविष्यन्तीति** । उत्तमं फलं मनसि निधायेत्यर्थः । अत्रापि बहुपुत्रभवनमेवै-तदुपासनस्य फलमिति न, किन्तु भूमोपासनसहकृतेन प्राणो-पासनेनोत्तमं फलं स्यादित्येव श्रुतेराशयः । अयमाशयः—

भूमा हि भगवान् । तदुपासनासहकृतं प्राणोपासनं न हीनफलं भवितुमर्हति किन्तूत्तमफलमेव स्यादिति निश्चयः । 'न मे भक्तः प्रणश्यती'ति प्रतिज्ञानात् । तस्मादत्र भगवद्भक्तिसहकृतस्य ज्ञानपूर्वकस्य कर्मण उत्तममेव फलं भवतीत्यत्रैव श्रुतितात्पर्यं, न तु बहुपुत्रभवन एवेति ज्ञातव्यम् ॥ ४ ॥

न केवलमुत्तमफलदमेवैतत्प्रणवोद्गीथैकत्वविज्ञानसहकृतमुपासनपि तु कर्मवैगुण्यापहारकमपीत्याह—

**अथ खलु य उद्गीथः स प्रणवो यः प्रणवः स उद्गीथ इति होतृषदनाद्धैवापि दुरुद्गीतमनुसमाहरतीत्यनुसमाहरतीति ॥ ५ ॥**

अथेति । 'अथ खलु य उद्गीथः स प्रणवो यः प्रणवः स उद्गीथ'इत्यादिना प्रणवोद्गीथादित्यप्राणानामाधिदैविकाध्यात्मादिपदार्थानामेकत्वविज्ञानोपासनं पूर्वोक्तं स्मारयति । तद्विज्ञानस्य फलमाह—इति एवमेकत्वसहकृतादुपासनादित्याशयः । उद्गाता होतृषदनाद्धोताः यत्रस्थ शंसति तत्स्थानात्तदुपलक्षिताद्धौत्रकर्मण इत्यर्थः । ह एव प्रसिद्धमेव दुरुद्गीतमपि किञ्चिद्विगुणमपि कर्माऽनुसमाहरति समीकरोति । यथा निपुणो भिषगप्रगल्भभिषजोत्पादितं धातुवैषम्यं चिकित्सया

समीकरोति तथेत्यर्थः । तत्कर्म तथा वैगुण्यरहितं करोतीत्यर्थः । सहोक्तमव्ययद्वयं दार्ढ्यद्योतकम् । क्रियाद्विरुक्तिरादरार्था । इति शब्दश्च तत्प्रकारकोपासनसमाप्त्यर्थः ॥ ५ ॥

**इति देवर्षिरमानाथसूरिकृते भगवद्धर्मबोधभाष्ये प्रथमाध्यायस्य पञ्चमः खण्डः ।**

## अथ षष्ठःखण्डः ।

परब्रह्माधिदैवभगवदादिशब्दवाच्यस्य पुरुषोत्तमस्य, सर्वलोकादिशब्दवाच्यमुक्तिफलिके ज्ञानभक्ती निरूपयितुमादौ तदवयवभूतानृक्सामादिपदार्थान्निरूपयति—

**इयमेवर्गाग्निः साम तदेतदस्यामृच्यध्यूढꣳसाम तस्मादृच्यध्यूढꣳसाम गीयत इयमेव साग्निरमस्तत्साम ॥ १ ॥**

**इयमेवेति** । **इयमेव** पृथिव्येव अग्न्यादिसर्वाधारभूता, **ऋक्** । अग्निरूपसामाधारत्वात् । यथा हि साम ऋचि गीयत इति ऋक्सामाधारस्तथाग्निः पृथिव्यामिन्धनादौ प्रायो लभ्यत इत्येषा भूमिरेव ऋगिवर्गित्यर्थः । **अग्निः** प्रसिद्धस्तेजःपदार्थः **साम** गानरूपम् । साम्न्यग्निदृष्टिःकर्तव्या । ऋगाधेयत्वात् । यथा वह्निः पृथ्व्यां पार्थिवे वस्तुनीन्धन आरूढं दृश्यते तथा सामापि ऋच्यध्यूढं दृश्यत इति द्वयोः साम्यमित्यर्थः । तदेवाह—**तदेतत्** पूर्वोक्तं सामेव साम ज्वलनाख्यं वस्तु, **एतस्यां** पृथिव्यामृचीवर्चि तदाधारभूतायामध्यूढमुपरिभावेन स्थितमनादिकालतः । यस्मादुपरिभावेन स्थितं **तस्मादेव** कारणादुद्गात्रादिभी **ऋच्यध्यूढं** मन्त्राक्षरोपर्येव साम गानरूपं गीयतेऽद्यापि । नायमेव साम्यहेतुः किन्त्वन्योपीत्याह—**इयमेव** पृथिव्येव **सा** स्त्रीत्वात्सावाच्या । सामश-

ब्दस्य पूर्वाक्षरमित्यर्थः । **अग्निर्वह्निरमः** । सामशब्दस्योत्तरार्धमित्यर्थः । अग्नेः पुंस्त्वात् । एवमुभयं भूमिरग्निश्च मिलित्वा सामशब्दवाच्यं भवति तदाह—**तत्तदुभयं साम** सामेव साम । ततश्च भूम्यग्नी शब्दतोऽर्थतश्च साम्यमैक्यं च लभते इत्युक्तं भवति ॥ १ ॥

अन्यत्राप्येवमृक्सामसाम्यं भवतीति दर्शयन्नाह—

**अन्तरिक्षमेवर्ग्वायुः साम तदेतदेतस्यामृच्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयतेऽन्तरिक्षमेव सा वायुरमस्तत्साम २**

**अन्तरिक्षेति** । **अन्तरिक्ष**मवकाशरूप आकाश एव **ऋक्** । वायोराधारत्वात् । **वायुः** साम । अन्तरिक्ष आधेयत्वात् । **तदेत**द्वायुरूपं सामेव **सामैतस्या**मन्तारिक्षरूपायामृची**वर्चि** अध्यूढमुपरिभावेन लब्धमनादितः । **तस्मादे**तत्कारणादेवोद्गात्रादिभिः **ऋच्यध्यूढं** मन्त्रेष्वारोहितमेव **साम गीयते**ऽद्यापि । आधाराधेयभावादेवा**न्तरिक्षमेव सा** सामार्धभागः । **वायु**राधेयभूतो**ऽमः** सामोत्तरार्धभागः । **तत्त**द्वयमेवमेकीकृत्य साम भवतीत्यर्थः ॥ २ ॥

**द्यौरेवर्गादित्यः साम तदेतदेतस्यामृच्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयते द्यौरेव साऽऽदित्योऽमस्तत्साम ॥ ३ ॥**

**द्यौरिति** । द्यौरेव देवलोकः सूर्याद्याधारस्थानमेव **ऋक्** । **आदित्य**स्तदाधेयः **साम, तदेत**दादित्यरूपः सामेव **सामै-तस्यां** द्युरूपायामृचीवर्चि अध्यूढमुपरिभावेन स्थितमाधे-यत्वादनादितः । **तस्मा**देवोद्गात्रादिभिरद्यापि **ऋच्यध्यूढ-**मेव **साम** गीयते । **द्यौरेव सा** सामपूर्वभागः । स्त्रीलिङ्गत्वा-दाधारत्वाच्च । आदित्योऽमः पुंस्त्वादाधेयत्वाच्च । इति सर्वं पूर्वज्ज्ञेयम् ॥ ३ ॥

**नक्षत्राण्येवर्क्चन्द्रमाः साम तदेतदेत-स्यामृच्यध्यूढँ साम तस्मादृच्यध्यूढँ साम गीयते नक्षत्राण्येव सा चन्द्रमा अमस्तत्साम ॥ ४ ॥**

**नक्षत्राणीति** । **नक्षत्राण्युडव एव** ऋगिवऋक् चन्द्रेण भुज्यमानत्वात् । **चन्द्रमाः** सामेव **साम** । चन्द्रमसो नक्षत्रपतित्वात् । **तदेत**च्चन्द्रमारूपं सामै**तस्यां** नक्षत्ररूपा-यामृचीवर्चि **अध्यारूढ**मुपरिभावेन स्थितं सदा । तस्मादेव **सामर्च्येवाध्यूढ**मारोहितं **गीयते** तद्विद्भिः । **नक्षत्राणि सा** स्त्रीत्वादर्धभागः । **चन्द्रमा** अम उत्तरार्धभागः, पति-त्वात् । **तत्त**दुभयमेवं मिलित्वा शब्दतोऽर्थतश्चैकीभवति **सामेति** चोच्यते ॥ ४ ॥

आधिभौतिकाध्यात्मिकाधिदैविकरूपमादित्यं निरूपयितुमादावाधिभौतिकतेजोमण्डलदृष्टिमुद्दिश्योच्यते—

**अथ यदेतदादित्यस्य शुक्लं भाः सैवर्गथ यन्नीलं परः कृष्णं तत्साम तदेतदेतस्यामृच्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयते ॥ ५ ॥**

**अथेति** । **अथ** भिन्नोऽयं प्रक्रमः । आधिभौतिकब्रह्मनिर्वचनरूपः प्रारम्भ इत्यर्थः । **यदेतत्** प्रत्यक्षतया दृश्यमानं मण्डलरूप**मादित्यस्य शुक्लं भा** अवदातरूपा द्युतिः **सैव ऋक्** । नीलाद्याधारत्वात् । **अथा**नन्तरं **नीलं** सूर्यकिरणेषु नीलरागरूपं तेजः । **परो** द्वितीयो भाग इत्यर्थः । अथवा परस् सकारान्तः शब्दः । **कृष्णं** नैल्यातिशयवत्तेजः । **तत्तु**भयं सामेव **साम** द्युतिरूपायामृच्याधेयत्वात् । किंवा शुक्लतेजस्याधारे आधेयत्वेन दृश्यमानत्वात् । सूर्यतेजस्सु तथा-तथा रागाः समाहितेन जनेन चिरदृष्ट्या द्रष्टुं शक्यन्ते । परमनुभवश्रमसाध्यमिदम् । **तदेत**न्नीलकृष्णतेजोरूपं सामै**तस्या**मवदाततमद्युतावृचीवर्चि अध्यूढमुपरिभावेन सर्वदा स्थितमस्ति । **तस्मा**देतत्कारणादेव ऋच्यध्यूढमेव ऋगाधारत्वेनैवोद्गात्रादिभिः **साम** गानरूपं गीयतेऽद्यापि । अन्यत्सर्वं पूर्ववज्ज्ञेयम् ॥ ५ ॥

संक्षेपत आध्यात्मिकः पुरुष उच्यते किंच पूर्वार्धभागेन परभागेन आधिदैविकः पुरुषः—

**अथ यदेवैतदादित्यस्य शुक्लं भाः सैव साऽथ यन्नीलं परः कृष्णं तदमस्तत्सा माऽथ य एषोन्तरादित्ये हिरण्मयः पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रण-खात्सर्व एव सुवर्णः ॥ ६ ॥**

अथेति । अथ भिन्नोऽयं प्रक्रमः । आध्यात्मिकत्वात् । सूर्यमण्डले एवाध्यात्मिकोऽपि पुरुषो विद्यते तस्याऽयं निरूपणारम्भ इत्यर्थः । **यदेव** चिन्मय**मेतदादित्यस्य** चिन्मयाक्षरब्रह्मण आदित्यस्य **शुक्लं भा** अवदाततमं तेजः । लिङ्गविशेषोऽविवक्षितः । **सा** एवावदातभा कान्तिरेव **सा** ऋक् । नीलकृष्णतेजसोराधारत्वात् । **अथानन्तरं यत्** यच्चेतनात्मकं **नीलं** किंचिद्गहनं तेजः **परो**ऽपरावयवश्चिन्मयः । **कृष्णम**तिगहनं तेजश्च । **तत्तदु**भयं साम, तदाधेयत्वात् । किंचिद्गहनताऽतिगहनता चोभयं तत्तेजस्येव दृश्यत इत्युभयं सामत्वेनोक्तम् । तदेतदुभयं कृष्णनीलात्मकं सामेव सामैतस्यामवदाततेजोरूपिण्यामृचीवर्चि अध्यूढमुपरिभावेन सर्वदा स्थितमिति सर्वं पूर्ववदिति श्रुत्या तन्नोक्तमप्यवगन्तव्यम्। **यच्छुक्लं भा** अवदाततमं तेजः **सैव सा** सामपूर्वभागः । **अथ** किंच

**यन्नीलं** तद्रूपं तेजः **परम्** परं च **कृष्णम**तिगहनं **तत्तदुभयमम**ः सामोत्तरार्धभागः । **तत्** एवमेतदुभयं मिलित्वा **साम** । भवतीति शेषः । अयमाशयः—पूर्वपर्याये ( पैरा ) यथाऽऽधिभौतिकः पुरुष उक्तस्तथाऽस्मिन्पर्यायार्धे आध्यात्मिकश्चिन्मयोऽक्षररूपः पुरुषो वर्ण्यते । उपलक्षणविधया नीलकृष्णादिपदार्थैस्तस्य सर्वे ऽवयवा उच्यन्ते । यन्मयास्तदवयवाः सा शुक्ला भा निर्दोषं चैतन्यम् । तच्चैतन्यमेव ऋग्रूपेण वर्णितम् । अवयवाश्च सामरूपेण । मृदि घट इव, सुवर्णे भूषणानीव चिति चिन्मया अवयवा वर्तन्त इत्युपरिभावोपि वर्णितः । चिन्मया एव सर्वेऽवयवा इति द्वयोः पूर्वोत्तरार्धभावोऽपि निरूपितः । एवमवयवी सामशब्दवाच्यो भवतीत्यपि च बोधितं 'तत्सामे'त्यन्तेन वाक्येन । ननु निराकारस्य ब्रह्मणो निरवयवत्वं सहस्रशः श्रुतिषु वर्ण्यते, सावयवस्यानित्यत्वमनुपास्यत्वं च, कथं पुनरत्र चिद्रूपस्याऽक्षरब्रह्मणः सावयत्वमुच्यत इति चेदेवम्—न हि निरवयवं सावयवं वा ब्रह्मेति तर्केण निर्णेतुं शक्यते । तस्य तर्कागोचरत्वात् । श्रुतिसिद्धं हि ब्रह्म, यथा श्रुत्योच्यते तत्तथैवेति मन्तव्यमास्तिकेन श्रुतेः स्वतःप्रामाण्यवादिना । श्रुतिस्तूभयविधं निरवयवं सावयवं च ब्रह्म निरूपयति 'निष्कलं निष्क्रियं' 'सहस्रशीर्षेति' च । अविरुद्धं तूभयत्वमपि सर्वधर्मविशिष्टे समर्थेऽचिन्त्यमहिम्नि ब्रह्मणि । सति संभवे लक्षणा त्वन्याय्या । अर्थवादस्तु भगवति निषिद्ध एव सर्वसमर्थत्वाद्ब्रह्मणः । अत एव सर्वसन्देहनिरा-

सकशास्त्रोत्तरमीमांसाकृता श्रीमता वेदव्यासेन सूत्रेषु 'कृत्स्न-प्रसक्तिर्निरवयवत्वशब्दव्याकोपो वे'त्याशङ्क्य 'श्रुतेस्तु शब्द-मूलत्वात्' इति समाहितम् । न च 'नेदं यदिदमुपासत'इ-त्यादिश्रुतिषु सावयवस्य मूर्त्यादेरनुपास्यत्वकथनान्न सावयवं ब्रह्मेति शङ्क्यम् । तत्र तथार्थस्यैवाभावात् । तथाहि—'यद्वा-चाऽनभ्युदितं येन वागभ्युद्यते तदेवं ब्रह्मत्वं विद्धि नेदं यदिदमुपासते' । इति हि श्रुतिः । अस्या अन्वयार्थौ तु—हे ज्ञानिन् भक्त वा **यत्** ( ब्रह्म ) **वाचा** लौकिकवाण्याऽ**न-भ्युदितं** वक्तुं विषयो न भवति, **येन** प्रेरकेण सता **वाक्** अभ्युद्यते स्वयमुद्गता भवति, **तदेव ब्रह्म त्वं इदं** (मूर्त्या-दिकं)विद्धि,यत् लोका उपासते(किन्तु)तत् **इदं न** । लौकि-कपदार्थान्तरं न भवति । अर्थात्—यन्मूर्त्यादिकं लोका उपासते तल्लौकिकं पदार्थान्तरं न भवति । किन्तु तदेव ब्रह्मास्ति यल्लौ-किकवाचा वक्तुं न शक्यते येन च वाणी प्रकाशत इति त्वं विद्धीति । यन्मूर्तावन्यथा भानं तज्जीवस्याविद्या, यथान्यत्र जगति विषये । अत्र मूर्त्यादीनामनुपास्यत्वमब्रह्मत्वं वा नोच्यते प्रत्युत मूर्त्यादेः साक्षाद्ब्रह्मत्वमुपास्यत्वं च विधीयते । ज्ञान-मार्गरीत्या सर्वस्य ब्रह्मत्वान्मूर्त्यादौ ब्रह्मत्वमुपास्यत्वं निर्दु-ष्टम् । उपासनारीत्यापि मन्त्रवशो भगवांस्तत्रायोगोलकेऽग्निरिव प्रविश्य स्थित इति मूर्त्यादेर्ब्रह्मत्वमुपास्यत्वमविस्खलितम् । भक्तिमार्गानुसारेणापि सेवकस्योत्कटभावेन मूर्त्यादौ वर्तमानो भगवानेनमुद्धरिष्यामीतीच्छयोद्भूय स्थित इति तस्य मूर्त्यादेर्भ-

गवत्वमुपास्यं चाविस्खलितम् । भावत्रयेणाप्यनया श्रुत्या मूत्यादेर्ब्रह्मत्वमुपास्यत्वं च निरूप्यत इति विद्वद्भिर्विभावनीयम् । तस्मादत्र छान्दोग्यश्रुतावपि सावयवमेव ब्रह्म भक्तिमतां ज्ञानवतां च भजनीयत्वाय मननीयत्वाय च वर्ण्यत इति न किंचिद्विरुद्धम् ।

भवतु प्रकृतमनुसरामः । एवमाध्यात्मिकाक्षरं ब्रह्म निरूप्य भिन्नप्रक्रमेणाधिदैविकं पुरुषोत्तमशब्दवाच्यमानन्दमयं पुरुषं पर्यायार्थेन निरूपयति-**अथेति** । अथ भिन्नोयं प्रक्रमः । आधिदैविकत्वात् । **यः** श्रुतिषु गूढतया वर्णित एव, भक्तैः प्रेम्णा द्रष्टुं शक्य **आदित्ये** आध्यात्मिके सूर्यरूपे पुरुषेऽ**न्तः** सूर्यस्य मध्य इत्यर्थः । **हिरण्मयो** हिरण्यमय आनन्दमयः । हिरण्यशब्दस्य यकारलोपश्छान्दसः । **पुरुषः** पुरुषाकारः साकारोऽतिसुन्दर इतिभावः । **दृश्यते** प्रत्यक्षीक्रियते भक्तैर्ज्ञानिभिश्च । 'दृश्यत' इत्यनेनाऽचाक्षुषत्वं निवार्य दिव्येन चक्षुषा द्रष्टुं शक्यत इति निरूपितम् । अत्र साकारं ब्रह्म निरूपितमिति हेतोस्तदवयवाः किम्मया इत्याशङ्का भवतीति तामपनेतुं-**हिरण्यश्मश्रुर्हिरण्यकेश इति** । उपलक्षणविधया सर्वेऽवयवा आनन्दमयाः सन्तीत्युक्तम् । तथापि तर्कैकाश्रयाणामानन्दमय इत्युक्ते दुःखसत्तासंभावनोद्भवेत्तामपनेतुमाह-**आप्रणखात्सर्व एव सुवर्ण इति** । केशान्त-

मारभ्य पादनखपर्यन्तं सर्व एव श्रीविग्रहः सुवर्ण आनन्द एव । परमसुन्दरे तस्मिन्नन्यगन्धोपि नास्तीत्यर्थः ।

पुरुषसूक्ते यथा 'पादोऽस्य विश्वाभूतानि' इत्यत्र क्षरपुरुषमाधिभौतिकं 'त्रिपादूर्ध्वमुदैत्पुरुष' इत्यत्र चाध्यात्मिकाक्षरपुरुषं निरूप्य,एतौ द्वावपि'एतावानस्य महिमे' त्यनेन क्षराक्षरपुरुषौ भगवन्महिमत्वेन परिचाय्य 'अतो ज्यायाꣳश्च पुरुषः' इत्याधिदैविकः पुरुषोत्तम उच्यते । स्मृतावपि च यथा 'द्वाविमौ पुरुषौ लोके' इत्यादिश्लोकेन क्षराक्षरपुरुषौ निर्दिश्य 'यस्मात्क्षरमतीतोह' मित्यादिना पुरुषोत्तम आधिदैविक उच्यते, तथाऽत्रापि 'अथ यदेतदादित्यस्ये' त्यादि प्रथमपर्यायेणा ( पैरा )धिभौतिकः क्षरपुरुष उक्तः । द्वितीये तु पर्यायार्धे संक्षेपत आध्यात्मिकोऽक्षररूपः पुरुषो निरूपितः । 'अथ य एषोऽन्तरादित्य इति शिष्टार्धेनाधिदैविकः पुरुषोत्तमः श्रीकृष्णो निरूच्यते भक्तानां भजनीयत्वाय ॥ ६ ॥

तस्य महामहापुरुषतामलौकिकतां च स्पष्टयति—

**तस्य यथा कप्यासं पुण्डरीकमेवमक्षिणी तस्योदिति नाम स एष सर्वेभ्यः पाप्मभ्य उदित उदेति ह वै सर्वेभ्यः पाप्मभ्यो य एवं वेद ॥ ७ ॥**

**तस्येति** । तस्यानन्दमयस्य पुरुषोत्तमस्य **यथा** यत्प्रकारकं **कप्यासं** कं जलं पिबतीति कपिः सूर्यः, तेन अस्यते विकास्यत इति कप्यासं विकसितमित्यर्थः । **पुण्डरीकं** ( भवतीति शेषः ) एवं तत्प्रकारिके **अक्षिणी** नेत्रकमले । सहि भगवानारक्तकमलदलनेत्रोस्तीत्युक्तं भवति । अथवा 'ये धातुशब्दा यत्रार्थ उपदेशे प्रकीर्तिताः । तथैवार्थो वेदराशेः कर्तव्यो नान्यथा क्वचित्' इतिनियमादासः आसनं, कपेरासः कप्यासः कप्यास इव कप्यासम् । कपिर्येन शरीरावयवेनोपविशति तदवयवभागः कप्यासशब्देनाऽत्रोच्यते । स चारक्तो भवति । तद्वत्पुण्डरीकमप्यारक्तम् । भगवन्नेत्रस्य पुण्डरीकमुपमानं, पुण्डरीकस्य च कप्यासमुपमानम् । विकसितारक्तकमलदलसदृशी भगवतो नयनद्वयी इति भावः । 'पुण्डरीकं सिताम्भोज'मितिकोशान्नेत्रयोः शुक्लतामात्रं मा भवत्वेतदर्थं कप्यासमिति विशेषणं पुण्डरीकस्य । अन्यथा विशेषणव्यर्थता स्यात् । तेन नेत्रोपमानपुण्डरीकोपमानत्वाद्गुणसाम्यमात्रग्रहणाच्च नाऽसभ्यता । महापुरुषत्वेपि अवयवादिवर्णनेन स्वरूपे लौकिकता समायातीति तां वारयितुमाह—**तस्योदिति नाम** । **तस्य** पुरुषोत्तमस्य 'उदिति' इत्यादि **नाम** नामान्तरं वर्तत इत्यर्थः । कुत इदमस्य नामेत्याह—**स** पूर्वोक्तावयवसुन्दरः **एष** पुरुषोत्तमः **सर्वेभ्यः** श्रुतदृष्टेभ्यः **पाप्मभ्यः** सुकृतदुष्कृतेभ्यः प्रसिद्धेभ्यस्तत्कार्येभ्यश्च **उदितोऽतिदूरं** गतः । अतिनिर्लेप इत्यर्थः । कर्मनिर्लिप्तत्वादेवास्योदिति

नामेति भावः । पाप्मशब्देनाऽत्र सुकृतदुष्कृते उभे गृहीते । 'नैने सेतुमहोरात्रे तरतो न जरा न मृत्युर्न शोको न सुकृतं न दुष्कृतं सर्वे पाप्मानोऽतो निवर्तन्त' इति श्रुतौ सुकृतदुष्कृतयोः पाप्मशब्देन संग्रहात् । तथा चानया श्रुत्या भगवति सर्वकर्मनिर्लेपता बोधिता भवति । ततश्च कचिल्लौकिकसदृशीं लीलामप्याचरतोऽस्य न कश्चिद्दोषसम्बन्धगन्धोपि । ननु 'सर्वकर्मनिर्लेप' इत्युक्ते भगवतो जगज्जन्मादिलीलालेशाभावोप्युक्तो भवति । ततश्च वास्तवं कर्तृत्वमेवापोहितं स्यादिति चेन्न । 'सर्वं वमाधिकारिक'मिति न्यायात्सर्वशब्दस्य भगवद्धर्मेषु संकोच एव । लीलानां भगवद्धर्मत्वात् । वस्तुतस्तु लेपो नामाभिमतिः । सा च भगवति नास्ति । अपहतपाप्मत्वादिति सर्वं समञ्जसम् ।

भगवत एवं स्वरूपज्ञाने फलमाह—ह वै निश्चयेन योऽधिकारी भगवन्तमेवं **वेद** वेत्ति **स सर्वेभ्यः पाप्मभ्यः** सर्वकर्मभ्य उदेत्युद्गच्छति । सर्वकर्मबन्धविनिर्मुक्तो भवतीत्याशयः ॥ ७ ॥

पुरुषोत्तमस्य माहात्म्यविशेषं निरूपयति—

**तस्यर्क्च साम च गेष्णौ तस्मादुद्गीथस्तस्मात्त्वेवोद्गातैतस्य हि गाता स एष ये चामुष्मात्पराञ्चो लोकास्तेषां चेष्टे देवकामानां चेत्यधिदैवतम् ॥ ८ ॥**

**तस्येति । तस्य** पूर्वोक्तस्यानन्दमयस्य भगवतः **ऋक्च सामच** ऋक्सामवेदौ । चकारद्वयेन यजुरथर्ववेदौ संगृह्येते । **गेष्णौ** स्वरूपगुणलीलाप्रतिपादकौ स्तः । चतुर्षु वेदेषु तस्यैव साक्षात्परंपरया वर्णनमित्यर्थः । उक्तं च स्मृतौ 'वेदैश्च सर्वैरहमेव वेद्य' इति । **तस्मात्**सर्ववेदप्रतिपाद्यत्वादेवा**यमुद्गीथ** इत्युच्यते । उत् उच्चैः सर्वश्रेष्ठतमत्वेन वेदैर्गीयतेऽसा**वुद्गीथः । तु** किंच **तस्मादेव** ऋत्विग्विशेषस्योद्गातेति नाम प्रसिद्धः । **हि** यतः कारणात्**स एतस्य** भगवतः सर्वसमर्थस्य **गाता** साम्नां गानकर्ता । भगवतः कर्तुमकर्तुमन्यथाकर्तुं च सामर्थ्यं वर्तत इत्याह—स पूर्वोक्तगुणस्वरूपविशिष्ट **एष** पुरुषोत्तमो **ये लोका अमुष्मा**त्स्वर्गात्स्वर्गादेः **पराञ्चो**ऽदृश्या अतिश्रेष्ठाश्च जनतपःसत्यादिलोकाश्चकारद्वयेन भूस्वर्गादिलोका**स्तेषां** सर्वे**षामीष्टे** समर्थो भवति । तन्नियमनकर्ता तत्सुखभोक्ता च भवतीत्यर्थः । **च** किंच **देवकामानां** तल्लोकनिवासिफलरूपाणां सुखानामपि चेष्टे । भाग्यभोगोपकरणभोगस्थानानां सर्वप्रकारेणेश्वर इति भावः । इत्यधिदैवतमेवं प्रकारेणापेक्षितमधिदैवतप्रकरणं सम्पूर्णम् ॥ ८ ॥

**इतिश्रीदेवर्षिरमानाथसूरिकृते भगवद्धर्मबोधभाष्ये प्रथमाध्यायस्य षष्ठः खण्डः ।**

# अथ सप्तम खण्डः ।

आधिदैवाध्यात्मिकाधिभौतिकाः पदार्थाः सर्वे ब्रह्मरूपा इति दर्शयितुं पुनरध्यात्मप्रकरणमुपक्रमते—

**अथाध्यात्मं वागेवर्क्प्राणः साम तदेत-देतस्यामृच्यध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम गीयते । वागेव सा प्राणोऽमस्तत्साम ॥ १ ॥**

**अथेति । अथाधुना** । आनन्तर्यमथार्थः । अध्यात्मं, तत्प्रकरणमुच्यत इत्यर्थः । वागेव परारूपा वाणी एव **ऋक्**, ऋगिव ऋक् । आधारत्वात् । **प्राणः** साम, सामेव साम । तदुपरिस्थितेः । **तदेत**त्प्राणरूपं **सामैतस्यां** वाग्रूपायाम**ृच्यध्यूढ**मुपरिभावेन स्थितम् । **तस्मादे**वोद्गात्रादिभिरद्यापि **ऋच्यध्यूढ**मेव **साम गीयते** ।

**वागेव सा** सामशब्दपूर्वभागः । प्राणोऽ**मः** सामोत्तरभागः । **तत्त**दुभयं मिलित्वा **साम** भवति । सर्वं पूर्ववत् । अत्र सर्वत्र त्रैरूप्यं परोक्षरूपेण वर्ण्यत इति ज्ञातव्यम् ॥ १ ॥

**चक्षुरेवर्गात्मा साम तदेतदेतस्यामृच्य-ध्यूढꣳ साम तस्मादृच्यध्यूढꣳ साम**

**गीयते । चक्षुरेव साऽऽत्माऽमस्त-त्साम ॥ २ ॥**

चक्षुरेवेति । सर्वं पूर्ववत् ॥ २ ॥

**श्रोत्रमेवर्ङ्मनः साम तदेतदेतस्यामृ-च्यध्यूढꣳसाम तस्माहृच्यध्यूढꣳसाम गीयते । श्रोत्रमेव सा मनोऽमस्तत्साम ३**

श्रोत्रमेवेति । सर्वं पूर्ववत् । ३ ।

एवं सामान्येन निरूप्य विशेषतयाऽऽधिभौतिकादिपुरु-षान्निरूपयितुं प्रथममाधिभौतिकपुरुषं निरूपयति—

**अथ यदेतदक्षणः शुक्लं भाः सैवर्गथ यन्नीलं परः कृष्णं तत्साम तदेतदेत-स्यामृच्यध्यूढꣳसाम तस्माहृच्य ध्यूढꣳ-साम गीयते । अथ यदेवैतदक्षणः शुक्लं भाः सैव साऽथ यन्नीलं परःकृष्णं तदमस्तत्साम ॥ ४ ॥**

अथेति । अथ भिन्नोयं प्रक्रमः । विशेपतया क्षरपु-रुषनिरूपणपरत्वात् । यदेतत्प्रत्यक्षतया दृश्यमानमक्ष्णः शुक्लं भाः नेत्रस्यावदाततमा कान्तिः सैव ऋक् ऋगिव-

ऋक् । नीलकृष्णवर्णयोराधारत्वात् । **यन्नीलं नीलरागः परम्** अपरं **कृष्णमसितवर्णं तत्तदुभयं साम** सामेव साम । आधेयत्वात् । **तदेतन्नीलकृष्णवर्णरूपं सामैतस्यामवदात-वर्णरूपायामृच्यध्यूढमुपरिभावेन** सर्वदा स्थितम् । **तस्मा-देव** वेदगानकर्तृभिरद्यापि **साम ऋच्यध्यूढमेव** गीयते ।

एवं गोलकरूप-( प्राकृते-आंख ) मक्षरं निरूप्याध्या-त्मिकाक्षररूपं पुरुषं निरूपयति-**अथ** भिन्नोऽयं प्रक्रमः । आदौ सर्वं पूर्ववत् । अग्रे तु-**यदेतद्दृक्ष्य**प्रमाण**मक्ष्णो** नेत्रस्याध्यात्मिकस्य शक्तिरूपचैतन्यस्याऽक्षरपुरुषस्य **शुक्लं भाः** शुद्धमवदातरूपं तेजश्चैतन्यरूपं **सैव** शुद्धतेजोरूपा शक्तिरेव **सा** सामशब्दपूर्वभागः । **अथा**ऽनन्तरं **यन्नीलं** शक्तिरूपं गहनं चैतन्यं, **परः कृष्णम**परमतिगहनं तद्रूपं तेज**स्तत्तदुभयममः**सामोत्तरार्धभागः । तदुभयं मिलित्वा तु साम । अक्षरं ब्रह्मेति यावत् ॥ ४ ॥

एवं पुरुषद्वयं निरूप्य पुरुषोत्तमं निरूपयति—

**अथ य एषोन्तरक्षिणि पुरुषो दृश्यते सैवर्क्तत्साम तदुक्थं तद्यजुस्तद्ब्रह्म तस्यै-तस्य तदेव रूपं यदमुष्य रूपं यावमुष्य गेष्णौ तौ गेष्णौ यन्नाम तन्नाम ॥५॥**

**अथेति** । **अथ** पुरुषद्वयनिरूपणानन्तरं पुरुषोत्तमनि-रूपणप्रक्रमोयमित्यर्थः । **यः** पूर्वोक्तगुणविशिष्ट **एष** श्रुति-

स्मृत्यादौ प्रसिद्धः **पुरुषः** साकारो भगवान् **अक्षिणि अन्तश्चक्षुर्मध्ये दृश्यते** भाग्यवद्भिर्भक्तैर्ज्ञानिभिश्चावलोक्यते । तस्य सर्वात्मकता वर्तते इत्याह—**सैव ऋक्**, पुरुष एव प्रसिद्धा ऋक् । तेनाधाररूपोऽयमेव सर्वत्रेति सूच्यते । **तत्साम** स एव प्रसिद्धं साम । आधेयभूतं वस्त्वप्येष एवेत्यर्थः । **तदुक्थं** स एव सामविशेषः । **तद्यजुः** स एव यजुर्वेदादिः । सर्वं वाङ्मयमयमेवेत्युक्तं भवति । **तद्ब्रह्म** प्रसिद्धमक्षरब्रह्मापि स एव । सर्वात्मकत्वादयमेव सर्वमितिभावः । आदित्यस्थश्चक्षुस्थितश्च द्वावप्येक एवेति वदति—**तस्यैतस्या** क्षिस्थितपुरुषस्य **तदेव रूपं** हिरण्मयमानन्दमयमेव स्वरूपं, **यदमुष्य रूपं** यत्परलोकस्थितस्यादित्यस्याधिदैविकस्यानन्दमयं रूपम् । यथाऽऽदित्यास्थिताधिदैविकस्यानन्दमयं स्वरूपं तथाऽक्षिस्थितस्याधिदैविकस्याप्यानन्दमयमेव स्वरूपमित्यर्थः । द्वयोरेकमेव स्वरूपमिति भावः । **यावमुष्य गेष्णौ** यावादित्यस्थितस्य स्तुतिगायकौ **तावेवास्यापि** चक्षुःस्थितस्य गेष्णौ सर्ववेदरूपौ । तस्य यदुद्गीथ इति, **उदिति च नाम** संज्ञा **तत्तदेवास्यापि** उद्गीथोदिति च नाम वर्तते । द्वावपि सर्वथा समानावित्यर्थः ॥ ५ ॥

तस्यैवास्यापि महाभाग्यातिशय इति वदति--

**स एष ये चैतस्मादर्वाञ्चो लोकास्तेषां चेष्टे मनुष्यकामानां चेति तद्य इमे**

**वीणायां गायन्त्येतं ते गायन्ति तस्मात्ते धनसनयः ॥ ६ ॥**

**स इति । स** पूर्वोक्तगुणविशिष्ट **एष** चक्षुःस्थितः परमात्मा **एतस्मा**त्प्रत्यक्षे दृश्यमानाल्लोकादर्वाञ्चो ये **लोका** जनतपःसत्यादयस्**तेषामिष्टे** तेषामीश्वरो भवति । न केवलमेतदेव किन्तु **मनुष्यकामानां** सार्वभौमादिमनुष्यसुखानां चकारादिन्द्रादिसुखानामपीष्टे, भोक्तुं दातुं च समर्थो भवतीत्यर्थः । कामशब्दोऽत्र सुखवाची । 'कामकामा लभन्ते' इति शास्त्रात् । **इति** एवं प्रकारेणायं पुरुषोत्तमः सर्वात्मकः सर्वसमर्थश्चेतिभावः । **तस्मा**देव कारणा**द्ये** केचन गायकाद्य **इमे** लौकिकाः अलौकिका इन्द्रादयश्च ते सर्वेऽप्येतं पुरुषोत्तमं **गायन्ति** स्तुवन्ति । **तस्मा**त्पुरुषोत्तमस्तवनादेव **ते धनसनयः** सुखलाभवन्तो भवन्ति । तथा च ये पुरुषोत्तमगायकास्ते सर्वसुखभाजो भवन्तीति भगवत्कीर्तने श्रुतेस्तात्पर्यम् ।६।

परमेश्वरोपासकस्य सर्वलोकप्राप्तिः फलं भवतीत्युच्यते—

**अथ य एतदेवं विद्वान्साम गायत्युभौ स गायति सोऽमुनैव स एष ये चामुष्मात्पराञ्चो लोकास्ताँश्चाप्नोति देवकामांश्च ॥ ७ ॥**

**अथेति । अथ** किंच **यो** भक्तो ज्ञानी वा **एत**त्परं

ब्रह्म **एवं** सर्वसुन्दरसर्वात्मकसर्वसमर्थतया **विद्वाञ्ज्ञानन्स-न्साम** गायति **स एवोभौ** सूर्याक्षिस्थितौ पुरुषौ समं गायति । उभयोः सामरूपत्वादेकत्वाच्च । **स** आदित्यसेवकः **स एष** चाक्षिपुरुषसेवकश्चाऽमुनैव पुरुषोत्तमेनैव साधन-भूतेनामुष्मात्स्वर्गाद्लोकाद्ये **पराञ्चो लोका** अत्युत्कृष्ट-स्थानानि **तान्सर्वानाप्नोति** गच्छति । किंच **देवकामान्दि**-व्यसुखान्यानन्दमयान्यधिगच्छति । उत्कृष्टसर्वलोकशब्दोऽत्र परोक्षरीत्या भगवद्वाचकोपि । भगवत एवोत्कृष्टसर्वलोकरूप-त्वात् । देवकामशब्दश्च दिव्यानन्दवाचकः । तथा च यो भगवन्तं सेवते स तमेव पुरुषोत्तमं प्राप्नोति, तदानन्दं चोपभुङ्क्त इति श्रुतेराशयः ॥ ७ ॥

न हि केवलं स्वयमेव तथा समर्थो भवत्यपि तु भगवदु-पासकः परस्यापि यजमानादेः सर्वकामान्सर्वलोकांश्च साध-यितुं समर्थो भवतीत्याह—

**अथानेनैव ये चैतस्मादर्वाञ्चो लोका-स्तांश्चाप्नोति मनुष्यकामाँस्तस्मादु हैवं विदुद्गाता ब्रूयात् ॥ ८ ॥**

**कं ते काममागायानीत्येष ह्येव कामा-गानस्येष्टे य एवं विद्वान्साम गायति साम गायति ॥ ९ ॥**

**अथेति** । **अथ** किंचाऽ**नेनैव** चाक्षुषेण भगवता पुरुषोत्तमेनैव, तदनुग्रहेणेत्यर्थः । **ये लोका एतस्मान्मनुष्यलोकादर्वाञ्चो** लोका अप्रत्यक्षलोका अतिश्रेष्ठाश्च, तान्**स** उद्गातादिराप्नोति गच्छति । किंच मनुष्यकामान्मनुष्यसुखानि चाप्नोति । तथासामर्थ्यवान्भवतीत्यर्थः । **तस्मात् उ** स्वसामर्थ्यादे**वैवंविदुद्गाता** यजमानं ब्रूयात्, भो यजजान **कं ते** काममागायानीति । तत्र कामिच्छाविषयीभूतं मनोरथं संपादयानीति । **हि** यस्मात्कारणा**देष एव** भगवत्सेवक एव यजमानाय **कामागानस्येष्टे** मनोरथसंपादनस्य समर्थो भवति । कोसौ तथा भवतीति चेत्—**य एवं विद्वान्** पूर्वोक्तप्रकारेण पुरुषोत्तमं जानन् **साम गायति** भगवत्स्तुतिकीर्तनं करोति । द्विरुक्तिर्भजनैकप्रकारसमाप्त्यर्थः ॥ ८–९ ॥

**इति श्रीदेवर्षिरमानाथसूरिकृते भगवद्धर्मबोधभाष्ये प्रथमाध्यायस्य सप्तमः खण्डः ॥**

# अथाष्टमः खण्डः ।

भगवान् हि नैकधा सेव्यो भवति किन्त्वनेकधा । कर्ममार्गेण ज्ञानमार्गेण भक्तिमार्गेण च । भक्तिमार्गे हि नवधा सेवा भवति प्राधान्येन । सेवा नाम परिचर्या, भक्तिमार्गानुकूला क्रियेति यावत् । केवलेन तत्तेन मार्गेण कृता सेवा तन्मार्गो भवति । ज्ञानेन कृता सेवा ज्ञानमार्गो भवति । स च नवप्रकारको भवतीति 'तपसा' इत्यादिग्रन्थे षष्ठस्कन्धे स्पष्टः । भक्तिप्राधान्येन कृता च सा भक्तिमार्गः कथ्यते । भक्तिश्च स्नेहः । न तत्र केवले मार्गत्वम् । अत एव 'परा' 'फलरूपा' इत्युच्यते । केवलस्नेहो हि विधिवद्धो न भवति । भक्तिमार्गप्रकारान्तरमेवोपासना । या तु परैरुपासनेत्युच्यते सा तूपासनैव न भवति । विषयस्य साधनस्य च कल्पितत्वेन भानात् । वैदिक्यामुपासनायां तु ज्ञानस्य फलत्वमत एव च सा ज्ञानाङ्गमुच्यते । ज्ञानं साक्षात्कारो न तु शाब्दम् । पूर्वखण्डेष्विह तथाविधोपासनाऽनेकप्रकारैरुक्ता संप्रति परोवरीयस्त्वगुणकमुपासनान्तरमुच्येत । तत्रावगमसारल्यार्थेतिहासाववद्धां कथामुपोद्घातयति—

**त्रयो होद्गीथे कुशला बभूवुः शिलकः शालावत्यश्चैकितायनो दाल्भ्यः प्रवाहणो जैवलिरिति, ते होचुरुद्गीथे वै**

**कुशला स्मो हन्तोद्गीथे कथां वदाम इति ॥ १ ॥**

**त्रयो हेति** । ह ऐतिह्ये । एवमितिहास इत्यर्थः । कदाचित्कस्मिंश्चित्तीर्थविशेषे केनचित्प्रसङ्गवशेन समेतानां ज्ञानिभक्तानामृषीणां मध्ये **शालावत्यः** शलावतोऽपत्यं पुमान् शिलको नामर्षिः, चिकितायनापत्यं पुमन्दाल्भ्यो नामर्षिः, जीवलस्यापत्यं पुमान्**प्रवाहणो** नाम राजर्षिश्चेति **त्रयस्त्रि-** संख्याका ज्ञानिभक्ता **उद्गीथे** परब्रह्मविचारविषये **कुशला बभूवुः** । विद्वांस एकत्र समेता आसन्नित्यर्थः । ते त्रयो ह परस्परं **वै** एव**मूचुः** । **वयं** त्रयोऽप्युद्गीथे भगवद्विषये **कुशलाः स्मो** समर्था वर्तामहे । **हन्त** यदि भवतामनुमतिस्तर्हि **उद्गीथे कथां** प्रबन्धकल्पनामनुसृत्य **वदामः** पूर्वपक्षोत्तरप-क्षाभ्यां वादं कुर्म इति । तेन चाऽसंभावनाविपरीतभावनादि-विरुद्धग्रहणं निवृत्तं स्यादिति ॥ १ ॥

**तथेति ह समुपविविशुः स ह प्रवाहणो जैवलिरुवाच भगवन्तावग्रे वदतां ब्राह्म-णयोर्वदतोर्वाचꣳ श्रोष्यामीति ॥२॥**

**तथेति** । ते त्रयोऽपि **तथेति** 'एवमस्त्वि'ति परस्परं स्वीकृत्य समुपविविशुः कस्मिंश्चिद्विविक्तस्थले तस्थुः । ह किन्तु तेषु **स** राजर्षिर्जैवलिः **प्रवाहण उवाच** तौ

ब्रह्मर्षी प्रत्युवाच भवन्तौ द्वावपि **भगवन्तौ** मम पूज्यतमा-वित्यग्रे पूर्वं **वदतां** वादं कुरुताम् । वदतोर्वादं कुर्वतो-र्ब्राह्मणयोर्भवतोर्वाचं ( पूर्वपक्षभूतां ) श्रोष्यामीति । ब्राह्म-णयोरिति पदं प्रवाहणस्य क्षत्रियतां प्रमाणयति ॥ २ ॥

**स ह शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाच हन्त त्वा पृच्छानीति पृच्छेति हो वाच ॥ ३ ॥**

**स हेति** । एवं जाते पूर्वं **शालावत्यः शिलकः चैकितायनं दाल्भ्यमुवाच हन्त** यदि हर्षात्स्वीकरोषि त्वामहं पृच्छामि प्रश्नं करवाणीति । दाल्भ्यः शिलकमुवाच **पृच्छ ह** भोः सुखेन प्रश्नं कुरुष्वेति ॥ ३ ॥

वादमेवोपस्थापयति—

**का साम्नो गतिरिति स्वर इति होवाच स्वरस्य का गतिरिति प्राण इति होवाच प्राणस्य कागतिरित्यन्नमिति होवाचा-ऽन्नस्य का गतिरित्याप इति होवाच॥४॥**

**केति** । लब्धसहचरसंमतिः शिलको दाल्भ्यमुवाच विद्वन् ! यद्येवं तर्हि **साम्नो** रथंतरनाम्नः स्तुतिगानस्य **का गतिः** किम्परायणम् । किं स्तुतिगानस्योत्कृष्टं स्थानमित्यर्थः । कस्य स्तुतिगानं जनेन कर्तव्यमिति त्वं वदेति प्रश्नाशयः ।

ह स तु प्रश्नमन्यथावऽगत्य **स्वरो** निषादर्षभादिस्वर एव साम्नः परायणमिति **उवाच** प्रत्युत्तरं दत्तवानित्यर्थः । गानात्मकत्वात्साम्नः स्वराश्रयत्वमुक्तम् । शिलकस्तदवगमानुसारमेवोत्तरं गृहीत्वा पुनः प्रपच्छ भोः स्वरस्य कागतिरिति । निषादर्षभादीनां क आश्रय इत्यर्थः । दाल्भ्य **उवाच प्राण इति** । भो विद्वन् स्वराणां प्राण एवाश्रयः । प्राणैरेव जनः स्वरमुच्चारयति । पुनः शिलकः पृच्छति स्म 'प्राणस्य का गति'रिति । **स होवाच** 'प्राणस्यान्नं गति'रिति । अन्नेनैव प्राणास्तिष्ठन्तीति प्राणानामन्नमेवाश्रयः । यथा हि वाजसनेयका आहुः 'शुष्यन्ति वै प्राणा ऋतेऽन्ना'दिति । पुनः शिलकः पृच्छति 'का चाऽन्नस्य गति'रिति । **स** दाल्भ्यो ह पुनरुवाचोत्तरं दत्तवान्भोः शिलक अन्नस्याऽऽपो **गति**राश्रयः । अद्भिरेवाऽन्नमुद्भवतीति ॥ ४ ॥

**अपां का गतिरित्यसौ लोक इति होवाचामुष्य लोकस्य का गतिरिति, न स्वर्गं लोकमतिनयेदिति होवाच, स्वर्गं वयं लोकꣳ सामाभिसंस्थापयामः स्वर्गसꣳस्तावꣳ हि सामेति ॥ ५ ॥**

**अपामिति । अपां का गतिः** क आश्रय इति पृष्टवन्तमेनं शिलकं दाल्भ्य **होवाच** प्रत्युवाच भो महर्षे अपामा-

श्रयोऽसौ लोको द्युलोकोऽस्ति । द्युलोक एव वृष्ट्यादेरपाम्श्रय इत्यर्थः । द्युलोकादेव पर्जन्या जलमभिवर्षन्ति । ततोपि पृच्छति शिलक आचार्यः 'अमुष्य द्युलोकस्य ( स्वर्गस्य ) का गतिः क आश्रय' इति । दाल्भ्यो होवाच प्रत्यूचे, शिलक स्वर्गं लोकं कश्चिदपि नातिनयेन्नोल्लंघयेत् । एतन्न कोपि न मन्येतेत्यर्थः । संभावनायां लिङ् । स्वर्गलोक एव साम्नः सर्वजगतश्च परमाश्रयः । 'स्वर्गः परमाश्रय' इति मद्वचनस्य कोपि विद्वानप्रामाण्यसंभावनामपि न करिष्यतीत्यर्थः । वयं स्वर्गं लोकं सामाभिसंस्थापयामः । स्वर्गलोक एव प्रतिष्ठितं भवतीत्यर्थः । हि अत एव साम स्वर्गसंस्तावं स्वर्गस्तुतिकर्तृ सामास्तीति तवोत्तरं निश्चितम् ॥ ५ ॥

**तꣳह शिलकः शालावत्यश्चैकितायनं दाल्भ्यमुवाचाऽप्रतिष्ठितं वै किल ते दाल्भ्य साम यस्त्वेतर्हि ब्रूयान्मूर्धा ते विपतिष्यतीति मूर्धा ते विपतेदिति ॥६॥**

तꣳहेति । शालावत्यः शिलकस्तमुत्तरदातारं चैकितायनं दाल्भ्यमुवाच भो दाल्भ्य ते तव प्रतिष्ठितत्वेनोच्यमानं साम रथन्तरनामकं स्तुतिगानं वै निश्चयेनाऽप्रतिष्ठितं प्रतिष्ठां परां गतिमप्रापितं वर्तते । किल नात्र संदेहः । एतर्हि साम्न्यप्रतिष्ठे सत्यपि यदि यस्त्वं तु धाष्टर्येन ब्रूयात्प्रतिष्ठित-

मेव मम सामेति कथयेस्तर्हि सत्याच्च्यवतस्ते मूर्धा मस्तकं विपतिष्यति । त्वं मरिष्यस इत्यर्थः । नाहमेवमाक्रोशे किन्तु शास्त्रमपि वदति **'मूर्धा ते विपते'** दिति । अथवा वादैक-समाप्तिसूचिका द्विरुक्तिरियम् ॥ ६ ॥

वादान्तरं प्रक्रमते—

**हन्ताहमेतद्भगवतो वेदानीति, विद्धीति होवाचामुष्य लोकस्य का गतिरित्ययं लोक इति होवाचाऽस्य लोकस्य का गतिरिति न प्रतिष्ठां लोकमतिनयेदिति होवाच प्रतिष्ठां वयं लोकꣳसामाभि-संस्थापयामः प्रतिष्ठा सꣳस्तावꣳहि सामेति ॥ ७ ॥**

**हन्ताहमिति** । इदानीं शिलकं दाल्भ्यः पृच्छति भोः शिलक ! **हन्त** यदि हर्षेण स्वीकरोषि तर्हि **भगवतः** पूज्यतमाद्भवतोऽहमेतत्स्वर्गलोकगतिं **वेदानि** वेदितुमि-च्छानि **इति** । शिलकेनोक्तं बाढं **विद्धीति**, जानीहीति । **होवाच** दाल्भ्यः पुनः पृच्छति स्म भोः शिलक ! यदि मदुक्तं स्वर्लोकमप्रतिष्ठितं ब्रवीषि, तर्हि त्वमेव वद**ामुष्य लोकस्य का गतिरिति** । स **होवाच** शिलकः प्रत्युवाचा**यं लोक इति** । स्वर्लोकस्याऽयं भूलोक एव गतिराश्रय इत्यर्थः ।

द्विविधो हि स्वर्गः । प्रसिद्धेर्लोकात्मकः । वाक्यशेषादात्मसुखं स्वर्गः । पुराणस्मृत्यादिषु लोकात्मकस्वर्गादेर्वर्णना वर्तते, तत्प्रसिद्ध्या स्वर्गो लोकः । 'यन्न दुःखेन संभिन्नं न च ग्रस्तमनन्तरम् । अभिलाषोपनीतं च तत्सुखं स्वःपदास्पद'-मिति वाक्यशेषो वर्तते, तेन चात्मसुखं स्वर्गः । तत्र शिलको दाल्भ्यश्चोभौ प्रसिद्धं लोकात्मकमेव स्वर्गं मन्येते । अत एव शिलकः स्वर्गस्य भूलोकमाश्रयं वदति । भो दाल्भ्य ! भूलोककृतैर्यज्ञादिकर्मभिरेतल्लोकवासिनः स्वर्गलोकस्थान्देवांस्तर्पयन्तीति भूलोक एव स्वर्गलोकस्य गतिरिति युक्तमुक्तं मयेत्यर्थः । अत एव भूर्लोकः प्रतिष्ठेत्युच्यते । स्वर्गस्य प्रतिष्ठेति । प्रतितिष्ठत्यनेनेतीत्यर्थः । **होवाच** पुनर्दाल्भ्यो जिज्ञासते स्म भोः शिलक ! **अस्य लोकस्य** भूर्लोकस्यापि **का गतिराश्रय इति** । शिलक उत्तरं दत्तवान्भो दाल्भ्य ! कश्चिदपि विद्वान् **प्रतिष्ठां** भुवं **लोकं नातिनयेन्नातिक्रमेत्** । संभावनायां-लिङ् । उल्लंघनसंभावनामपि न कुर्यादित्यर्थः । अर्थाद्भूरूपस्य प्रतिष्ठालोकस्य कश्चनापर आश्रयोऽस्तीति मनसापि न चिन्तयेत् । **वयमस्मादृशाः** सर्वे पण्डिताश्च **साम** रथन्तरस्तुतिगानं **लोकं** भूर्लोकेऽ**भिसंस्थापयामः** सर्वतः प्रतिष्ठितं कुर्मः । **हि** तस्माद्धेतोः **प्रतिष्ठासंस्तावं** भूलोकस्तुतिपरं **साम** स्तुतिगानम् । अस्तीति शेषः । **इति** एवं तवोत्तरमहं ददामीत्यर्थः ॥ ७ ॥

सिद्धान्तविशोधनाय प्रवाहणो राजर्षिः शिलकोत्तरमपि पूर्वपक्षयन्स्वस्य सामाभिज्ञतां दर्शयति—

**तꣳह प्रवाहणो जैवलिरुवाचान्तवद्वै किल ते शालावत्य साम यस्त्वेतर्हि ब्रूयान्मूर्धा ते विपतिष्यति मूर्धा ते विपतेदिति । हन्ताहमेतद्भगवतो वेदानीति विद्धीति होवाच ॥८॥**

इति प्रथमाध्यायस्याष्टमः खण्डः ।

**तꣳहेति** । ह तदा तं शिलकं राजर्षिः **प्रवाहणो जैवलि**श्चोदयामास भो शालावत्य ! **ते वै** तवापि **सामान्तवद्** प्रतिष्ठमनित्य इति यावत् । भूर्लोको ह्यप्रतिष्ठोऽनित्यश्च तस्मात्तव तत्स्तुतिगानरूपरथन्तरमपि तदाश्रितत्वादप्रतिष्ठमन्तवच्चास्तीत्यर्थः । **तु** किन्तु यो भवा**नेतर्हि** साम्न्यप्रतिष्ठे सत्यपि धृष्टतया **ब्रूयात्** 'प्रतिष्ठितं मे सामेति' कथयेस्तर्हि ते तव **मूर्धा** शिरो विपतिष्यति । नाहमेवं ब्रवीमि शास्त्रमपि वदति **मूर्धा ते विपते**'दिति । एवमुभयोरनभिज्ञत्वे जाते शिलकः प्रवाहणमुवाच, भोः प्रवाहण ! **हन्ता**तिहर्षेणाहं शिलक **एत**त्सामाश्रयसिद्धान्तं **भगवतः** पूज्यतमाद्भवत एव **वेदानि** वेदितुमिच्छानि इति । गुरूपसत्तिं करोमीत्यर्थः । प्रवाहणस्त**मुवाच ह** निश्चितं त्वमेतन्मत्तो **विद्धि** जानीहि इति ॥ ८ ॥

**इति श्रीदेवर्षिरमानाथसूरिकृते भगवद्धर्मबोधभाष्ये प्रथमाध्यायस्याष्टमः खण्डः ।**

## अथ नवमः खण्डः ।

इदानीं सामादिलोकान्तानां सर्वेषां पदार्थानां भगवान्पुरुषोत्तम एवाश्रयः स चाकाशनामा परोवरीयस्त्वगुणक इति प्रवाहणो राजर्षिः सिद्धान्तयति—

**अस्य लोकस्य का गतिरित्याकाश इति होवाच सर्वाणि ह वा इमानि भूतान्याकाशादेव समुत्पद्यन्त आकाशं प्रत्यस्तं यन्त्याकाशो ह्येवैभ्यो ज्यायानाकाशः परायणम् ॥ १ ॥**

**अस्येति** । इदानीं शिलकः प्रवाहणं पृच्छति भोः प्रवाहण ! **अस्य लोकस्य** मया प्रतिष्ठारूपत्वेनाऽवगतस्य भ्वादेर्लोकस्य **कागतिः** क आश्रय इतीदानीं त्वमेवोत्तरं कुरु । स प्रवाहणस्तमुवाच भोः शिलक ! **आकाश** एवाऽस्य लोकस्य ह निश्चयेन गतिराश्रयः । निर्लेपत्वात्सर्वप्रकाशत्वाच्च । आकाश इति भगवतः पुरुषोत्तमस्य नाम । आ समन्तात् काशते प्रकाशत इत्याकाश इति । तथा चाकाश आनन्दमयः पुरुषोत्तम एव सामादिलोकान्तानां सर्वपदार्थानामाश्रय इति त्वं निश्चयं कुर्विति प्रवाहण आचार्यः सिद्धान्तयां

चकार । ह यतः कारणात्**सर्वाणि** दृष्टश्रुतानि भूतानि चराचराणि जीवजडान्या**काशादेव** पुरुषोत्तमादेवाकाशनाम्नः **समुत्पद्यन्ते सम**विकृतकारणविधिनो**त्पद्यन्ते** प्रादुर्भवन्ति। पुनः सृष्टिविरामे **आकाशं प्रत्या**काश एवाऽ**स्तं यन्ति** तिरोभवन्ति । लौकिकनामरूपे विमुच्यैकीभवन्ति, तद्रूपतां प्राप्नुवन्तीत्यर्थः । **हि** यस्मात्कारणा**दाकाश एव** पुरुषोत्तम **एवैभ्यः** सृष्टिवर्तिभ्यश्चराचरपदार्थेभ्यः सकाशा**ज्ज्यायान**तिश्रेष्ठः । **आकाश** एवास्य लोकस्य **परायणं** परमागतिः, परमाश्रय इत्यर्थः । नन्वाकाशशब्दो भूताकाशे रूढस्तथाच 'योगाद्रूढिर्बलीयसी' ति न्यायादिहाकाशशब्देन भूताकाश एव कुतो न गृह्यत इति चेन्न । वाक्यार्थापेक्षया पदार्थस्य दुर्बलत्वात् । वाक्यार्थो हि सर्वगतित्वं सर्वज्यायस्त्वं परोवरीयस्त्वमनन्तत्वं सर्वकारणकारणत्वं च । पदार्थस्तु भूताकाशः । तद्यदि भूताकाशो गृह्येत, तदा सर्वपदार्थसङ्कोचेन सर्वपदसामर्थ्यस्याद्धेबाधाद्भूतादीनां पदानामपि तद्बाध्येत । तच्चासङ्गतम् । एकपदानुरोधेनानेकपदार्थसङ्कोचात्मकस्य सामर्थ्यबाधस्यानुचितत्वात् । नच ब्रह्मत्वे स्वीकृत आकाशशब्दे लक्षणा कर्तव्या भवतीति वाच्यम् । मुख्यतया सर्वशब्दानां वाच्यताया ब्रह्मण्येव पर्यवसितत्वात् । असङ्कुचितवृत्त्या सर्ववेदप्रतिपाद्यं ब्रह्मैवेति । तस्मादाकाशः परब्रह्मैव सर्वलोकान्तानां पदार्थानां परम आश्रय इति सिद्धम् ॥ १ ॥

अथैतदुपासनाप्रधानलक्ष्यं परोवरीयस्त्वमलौकिकगुणं निरूपयति—

**स एष परोवरीयानुद्गीथः स एषोऽनन्तः परोवरीयो हास्य भवति परोवरीयसो ह लोकाञ्जयति य एतदेवं विद्वान्परोवरीयाꣳसमुद्गीथमुपास्ते ॥ २ ॥**

**स एष इति । स** पूर्वोक्त आकाशशब्दवाच्यो जगज्जन्मस्थितिभङ्गाश्रयः **एष उद्गीथः** पुरुषोत्तमः **परोवरीयान्** परादपीन्द्रियादेः परः परत्वगुणविशिष्टो, वरादक्षरादपि विशिष्ट इति च परोवरीयान्परश्चासौ वरीयांश्चेति परोवरीयानस्ति। **स एषोऽनन्तः** स परोवरीयस्त्वगुणविशिष्टः एष पुरुषोत्तमो**ऽनन्तो** व्यापकोऽनन्तरूपश्च । परोवरीयानित्यस्यायं भावः—'इन्द्रियाणि पराण्याहुः' 'अव्यक्तात्पुरुषः परः' 'एतावानस्य महिमा' 'अतो ज्यायाꣳश्च पुरुषः' 'पुरुषान्न परं किंचित्' इत्यादिश्रुतिभ्यः, 'यस्मात्क्षरमतीतोहमक्षरादपि चोत्तम' इत्यादिस्मृतिभ्यश्चेदमुक्तं भवति यत्पुरुषोत्तमः परशब्दवाच्यादिन्द्रियादिक्षरपुरुषात्परः । किंच तत्परशब्दवाच्यादक्षराव्यक्तपुरुषात्कारणब्रह्मणोपि वरोऽतिशयेन श्रेष्ठ इति परोवरीयानिति कथ्यते। अत एव चोद्गीथः। उत् उच्चैः सर्वश्रेष्ठत्वेन गीयते वेदादिभिरुच्यतेऽसावुद्गीथः । अनन्तत्वं च व्यापकत्वे-

नानन्तरूपत्वेन च ज्ञातव्यम्। 'आकाशवत्सर्वगतश्च' 'तं यथा यथोपासते तत्तदेव भवती'ति श्रुतिभ्याम्।

एवमुपास्यं निरूप्योपासकफलं निरूपयति—ह निश्चयेनास्योपासकस्य भगवत्सेवकस्येत्यर्थः। **परोवरीयो भवति** श्रेष्ठादपि श्रेष्ठतमं जीवनं भवति। ह किंच स परोवरीयसो **लोकान्**स्वर्गादिब्रह्मान्तान्पदार्थाञ्**जयति** प्राप्तुं समर्थो भवति। कोऽसौ—**य एतत्**परं ब्रह्मै**वं** पूर्वोक्तप्रकारेण **विद्वा**ञ्जानन्नुद्गीथं परमात्मानमुपास्ते सेवते, सः॥ २॥

नाहमेवैवं ब्रवीमि किन्तु पुराऽप्यपरे ऋषयः स्वस्वशिष्येभ्य एवमनुशासनं चक्रुरित्याह—

**तꣳ हैतमतिधन्वा शौनक उदरशाण्डिल्यायोक्त्वोवाच यावत्त एनं प्रजायामुद्गीथं वेदिष्यन्ते परोवरीयो हैभ्यस्तावदस्मिंल्लोके जीवनं भविष्यति॥३॥**

तꣳ हेति। ह प्रसिद्धमिदं यदतिधन्वा नामर्षिः **शौनकः** शुनकपुत्र **उदरशाण्डिल्याय**ोदरशाण्डिल्यनाम्ने स्वशिष्याय **तमेतं** पूर्वोक्तगुण**मुद्गीथ**ोपासन**मुक्त्वा** निरूप्यो**वाच** कथयामास भो वत्स **याव**द्यावत्कालपर्यन्तं **ते** तव **प्रजायां** पुत्रपरम्परायामे**नमुद्गीथ**मेतदुद्गीथोपासनं वेदयिष्यन्ते ज्ञास्यन्ति। त्वद्वंशजा इति शेषः। ह निश्चयेन तावत्कालप-

र्यन्तम**स्मिंल्लोके** तेषा**मेभ्यो** दृश्यमानभाग्येभ्यो जनेभ्यः **परोवरीयो जीवनं** श्रेष्ठादपि श्रेष्ठतमं भागधेयं भविष्यति ॥३॥

न केवलमस्मिन्नेव लोके तेषां भाग्यवत्ता भविष्यति किन्तु परस्मिन्नपि लोके तथाभाग्यवन्तस्ते भविष्यन्तीत्याह—

**तथाऽमुष्मिंल्लोके लोक इति स य एतदेवं विद्वानुपास्ते परोवरीय एष हास्यास्मिंल्लोके जीवनं भवति तथाऽमुष्मिंल्लोके लोक इति लोके लोक इति ॥ ४ ॥**

**तथेति । तथा** एवमेवा**मुष्मिंल्लोके** स्वर्गादिलोकेऽप्येषां त्वद्वंशजानां **लोकः** परोवरीयो जन्म भविष्यतीत्युवाच शौनकः। स्यादेतत्तत्तत्सामयिकानामेतत्समयभवानां किमेतेनेति चेत्—**स यो**ऽपरोपि कश्चि**देवं विद्वान्** पूर्वोक्तप्रकारेण **विद्वान्** जानन्नेत दुद्गीथ**मुपास्ते** सेवते, ह निश्चयेनाऽ**स्यो**पासकस्य **जीवनमस्मिंल्लोके परोवरीय एव** श्रेष्ठादपि श्रेष्ठतममेव **भवति** स्यात् । किंचाऽ**मुष्मिंल्लोके** परलोकेऽपि तस्य **लोकः** श्रेष्ठतमा गतिः स्यात् । द्विरुक्तिरुपासनसमाप्त्यर्था ॥

**इतिश्रीदेवर्षिरमानाथसूरिकृते भगवद्धर्मबोधभाष्ये प्रथमाध्यायस्य नवमः खण्डः ॥**

## अथ प्रथमाध्यायस्य दशमः खण्डः

अथ प्रस्तावविषयत्वेन प्रतीहारविषयत्वेन आदित्यादिस्थः परमात्मैवोपास्य इति निरूपयितुमाख्यायिकामारभते। प्रस्तावः प्रकर्षेण स्तवनम्। प्रतिहरणं प्रतीहारः। कः प्रकर्षेण स्तूयते कश्च प्रत्याह्रियत इति विचारे आदित्यादिस्थः परमात्मैव तत्तद्विषय इति सिद्धान्तयितुमेषाऽऽख्यायिका ब्रह्मबोधपरमा प्रस्तूयते—

**मटचीहतेषु कुरुष्वाटिक्या सह जाययोषस्तिर्ह चाक्रायण इभ्यग्रामे प्रद्राणक उवास ॥ १ ॥**

**मटचीत्यादि**। ह इत्यैतिह्ये। **मटचीहतेषु** करकावृष्टिकृतदुर्भिक्षनाशितेषु कुरुषु कुरुदेशेषु **इभ्यग्रामे**, हस्तिपकग्रामे कश्चन चक्रायणवंशजश्चक्रवंशजो वोषस्तिनामर्षिराटिक्याऽपगतपयोधरादिस्त्रीव्यंजनयाऽतएव **जायया** स्वस्त्रिया **सह प्रद्राणकः** पलाय्य गतोऽन्नाद्यलाभादतिदुर्दशां प्राप्तःसन्नुवास निवासं चक्रे। मटच्यः करकाः गुर्जरे 'करा' इति, हिन्दीभाषायां च 'ओला' इति च प्रसिद्धा वर्षाहिमानीखण्डाः। ताभिः सस्यादिषु नष्टेषु समग्रः कुरुदेशो नाशमिव प्राप्तः। किन्त्विभ्यग्रामेऽन्नसंभावनया पलाय्य गतो जीवनपर्याप्तमप्यन्नाद्यलभमानः कुत्सितां गतिमनुभवन्कथं कथ-

मप्युवास । दुर्भिक्षादिषु युवतिस्त्रीसाहचर्यादिकं भयावहं परिभ्रमणविघ्नकरं च भवतीत्याशंकाऽऽटिकीकथनेन निवारिता । यत्तु केचनाटिकीशब्दस्यानुपजातपयोधरादिस्त्रीव्यंजनेनत्यर्थं कुर्वन्ति नत्वपगतपयोधरेति, स तु जायाशब्दसाहचर्येण विरुद्ध्यत इति न युक्तः ॥ १ ॥

**स हेभ्यं कुल्माषान्खादन्तं बिभिक्षे तꣳ होवाच । नेतोऽन्ये विद्यन्ते यच्च ये म इम उपनिहिता इति ॥ २ ॥**

**स हेति** । ह एवं श्रूयते, स एकदाऽन्नार्थमटन्कांचित्कुल्माषान्कुत्सितान्माषान्खादन्तमिभ्यं विभिक्षे ययाचे । भो एतान्मह्यमपि देहीति । **तमृषिं होवाच,** स हस्त्यारोहो विनयेन प्रत्युवाच । भो ब्रह्मन् ! **यच्च मे** मम गृहे **ये** कुल्माषाः संगृहीतास्ते सर्वेपि **इमे** कुल्माषा मयाऽस्मिन्भोजनपात्रे **उपनिहिताः** परिवेशिताः । किमन्यत्—**इत** एतेभ्योऽन्येऽनुच्छिष्टाः कुल्माषा न **विद्यन्ते** ये भवत उपह्रियेरन्किं करो**मीति** ॥२॥

**एतेषां मे देहीति होवाच तानस्मै प्रददौ हन्तानुपानमित्युच्छिष्टं वै मे पीतं स्यादिति होवाच ॥ ३ ॥**

**एतेषामिति** । ह **उवाच** । स उषस्तिस्तमिभ्यमुक्तवानित्यर्थः । किमितिचेत्—'भो **एतेषा**मवशिष्टानेव कुल्मा-

षान्मे मह्यं देहीति वितरेति । स तु विद्वांसममुमतिबुभुक्षितं विदित्वा तान्कुल्माषानस्मै उषस्तये प्रददौ सप्रणति विनयेन ददौ । किंच भो विद्वन्हन्त तवेमां दशां निरीक्ष्यातिकष्टे वर्ते, अहमप्यन्नाद्यभावादातिथ्यं कर्तुमसमर्थोऽस्म्यथापि कुल्माषा अनुगृहीताश्चेदनुपानं भोजनेन सहावश्यमपेक्षितं पानीयमपीदं गृह्यतामिति इत्येवं च स इभ्य उवाच । स होवाच । उषस्तिः प्रत्युत्तरं दत्तवान् 'यद्यहं पानीयमपि ते पिबेयं वै निश्चयेनोच्छिष्टमेव मे पीतं स्यात् इति ॥ ३ ॥

**न स्विदेतेऽप्युच्छिष्टा इति न वा अजीविष्यमिमानखादन्निति होवाच, कामो म उदकपानमिति ॥ ४ ॥**

**न स्विदिति** । भो विद्वन् किंस्विदेते कुल्माषा अप्युच्छिष्टा न सन्ति ? । प्रश्नोक्तिरियम् । इत्येवं स इभ्यः पृष्टवानित्यर्थः । होवाच उषस्तिराचार्य एतमेवमनुशास्ति स्म । 'भो अहमिमान्कुल्माषानखादन्नभक्षयन्नवाऽजीविष्यं नैव जीवितोऽभविष्यम् । बुभुक्षयाऽतिकष्टां दशामापन्नोऽपि यद्यहमेतानुच्छिष्टानपि कुल्माषान्नैवाऽखादिष्यंस्तर्हि मम जीवितमिदानीमेवापागमिष्यदित्यर्थः । तेन ममायमापद्धर्म इति यावत् । तर्हि पानीयं मया कथं न गृहीतमिति चेत् कुल्माषैरेव जीवन्यदि तवोदकमप्यहं पिबेयं तर्हि तदुदकपानं

**मे** मम **कामः** सुखाभिलाषः स्यात् । ततश्च पापमेव स्यादित्यर्थः । **इति** इति हेतोर्मया तव पानीयं न गृहीतम् ।

एतदिह ज्ञातव्यम् । विद्याधर्मवान्स्वत्वमपरोपकारसमर्थोऽहं बुभुक्षया म्रियमाणोऽन्यतोऽन्नमलभमानस्तव कुल्माषान्खादन्नपि न पतितो भवामि । धर्मरक्षार्थमेवात्मरक्षायाः प्रथमकर्तव्यत्वात् । देहस्य च धर्मसाधनत्वात् । कुल्माषमात्रैर्जीवता च मयोदकपानन्त्वन्यतोपि लब्धं स्यात्तथापि तत्रैव यदि गृह्णामि तदिदं मम सुखाभिलाषः स्यात् । ततश्च 'कामात्मता न प्रशस्ता न चैवान्तमकामता, इति स्मृतेः कामात्मताया निषिद्धत्वात्पातकं स्यादेव । तत एव पानीयं न गृहीतमित्युवाचोषस्तिरिभ्यमिति भावः ॥ ४ ॥

'आत्मानं सततं रक्षेदि'ति पूर्वमात्मरक्षां विधायाऽनन्तरं 'दारान्रक्षेद्धनैरपि' इति न्यायमनुसरन्नग्रे कृतिमाह—

**स ह खादित्वाऽतिशेषाञ्जायाया आजहार साऽग्र एव सुभिक्षा बभूव तान्प्रतिगृह्य निदधौ ॥ ५ ॥**

**स इति । स** ह्योषस्तिर्बुभुक्षापर्याप्तं कुल्माषान्खादित्वाऽतिशेषांस्ततोऽवशिष्टांस्तद्बुभुक्षासंभावनया जायायै स्वपत्न्यै **आजहारा**ऽऽनीय ददावित्यर्थः । **सा त्वग्र एव** पूर्वमेव **सुभिक्षा** भिक्षां प्राप्य कृतभोजनाऽऽसीत्तथापि

पत्यानीतमनवज्ञाय स्त्रीस्वाभाव्यात्तान्प्रतिगृह्य पत्युर्हस्ताद् गृहीत्वा निदधौ धृतवती ॥ ५ ॥

**स ह प्रातः संजिहान उवाच यद्बतान्नस्य लभेमहि लभेमहि धनमात्राꣳराजासौ यक्ष्यते स मा सर्वैरार्त्विज्यैर्वृणीतेति ॥ ६ ॥**

**स हेति । प्रातः** परेद्यवि प्रभाते **स ह** स उषस्तिः संजिहानः शयनास्तरणं परित्यजन्पत्नीमाश्राव्य**ोवाच बत**ानिकृष्टे वर्ते **यत्** यद्यान्नस्य स्तोकमपि लभेमहि प्राप्स्यामस्तर्हि तदन्नं भुक्त्वा लब्धसामर्थ्याः सन्तो **धनमात्रां** धनस्याल्पांशमपि जीवनपर्याप्तं **लभेमहि** लप्स्यामहे । कुत इयं धनप्राप्तिः स्यादितिचेत्—दिव्येन चक्षुषा विलोक्येवाच, **असौ** समीपस्थो **राजा** यक्ष्यते यज्ञं करोति । **स मा** तथा कर्मसमर्थं मां सर्वैरार्त्विज्यैर्निखिलर्त्विक्कर्मप्रयोजनाय **वृणीत** वरिष्यत इति विचारयामि । संभावनायां लिङ् ॥ ६ ॥

**तं जायोवाच हन्त पत इम एव कुल्माषा इति तान्खादित्वाऽमुं यज्ञं विततमेयाय ७**

**तमिति ।** तमेवं ब्रुवाणं जायाऽऽगत्योवाच **हन्त** प्रसीदामि तव वचसाऽनेन **पते** ( आर्षो गुणः ) स्वामिन् । **इम एव कुल्माषा** ह्योऽहनि भवदानीता एवैते कुलमषाः सन्ति । गृह्यतामित्यानीय दत्तवतीति इतेरर्थः । स च कृतनित्यनि-

यमस्तान्कुल्माषान्खादित्वाऽमुं समीप एव वर्तमानं विततं बहुसंभारेण क्रियमाणं **यज्ञमेयायाऽऽगतवान्** ॥ ७ ॥

**तत्रोद्गातॄनास्तावे स्तोष्यमाणानुपोपविवेश स ह प्रस्तोतारमुवाच ॥ ८ ॥**

**तत्रेति। तत्र** राज्ञो यज्ञ आगत्या**स्तावे** आगत्य स्तुवन्त्यस्मिन्नित्यास्तावः स्तुतिकर्मप्रदेशस्तस्मिन् स्तोष्यमाणान् समये मन्त्रैः स्तुतिं कर्तुमुद्यताना**मुद्गातॄनु**द्गातृप्रस्तोतृप्रतिहर्तृप्रभृतीना**मुप** समीप एवोपविवेश स्थितवानित्यर्थः । षष्ठ्यर्थे द्वितीया । **ह** स्तवनसमये च **स** उषस्तिः **प्रस्तोतारं** प्रस्तोतृकर्मनियुक्तमृत्विजं प्रस्तवनोद्यत**मुवाच** वक्ष्यमाणं कथयामास ॥ ८ ॥

**प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रस्तोष्यसि मूर्धा ते विपतिष्यतीति ॥ ९ ॥**

**प्रस्तोतरिति।** भो **प्रस्तोतर्या** काचन **देवता** तत्कर्माधिष्ठातृदेवता प्रस्तावमन्वायत्ता तन्नाम्नीं कृतिमनुगता **तां** देवतामविद्वान**जानन्नपि** चेद्विदुषो मम पुरः **प्रस्तोष्यसि** प्रस्तावं करिष्यसि, **ते** तव **मूर्धा** शिरो **विपतिष्यति** इति एवं व्याजहारेत्यर्थः ॥ ९ ॥

**एवमेवोद्गातारमुवाचोद्गातर्या देवतोद्गीथ**

**मन्वायत्ता तां चेदविद्वानुद्गास्यसि मूर्धा ते विपतिष्यतीति ॥ १० ॥**

एवमिति । **एवमेव** यथा प्रस्तोतारमुवाच तथैवोद्गातारं सामस्तुतिकर्तार**मुवाच**, भो उद्गातः सामगायक! **या देवता** तत्कर्माधिष्ठातृदेवतोद्गीथमन्वायत्ताऽनुगता **तां** चेत्त्वमविद्वान्नजानन्नेवोद्गीथ**मुद्गास्यसि** श्रेष्ठत्वेन वर्णयिष्यसि, तर्हि मूर्धा **ते विपतिष्यति** इति ॥ १० ॥

**एवमेव प्रतिहर्तारमुवाच प्रतिहर्तर्या देवता प्रतिहारमन्वायत्ता तां चेदविद्वा-न्प्रतिहरिष्यसि मूर्धा ते विपतिष्यतीति ते ह समारतास्तूष्णीमासांचक्रिरे ॥११॥**

एवमेवेति । **एवमेव** यथोद्गातारं तथैव **प्रतिहर्तार**-मपि प्रतिहरणायोद्यतमृत्विज**मुवाच**, भो प्रतिहर्तः **या देवता** योधिष्ठातृदेवः **प्रतिहारमन्वायत्ता** प्रतिहारकर्मानुगतस्तां चेत्त्व**मविद्वान्**मम विदुषः पुरः प्रतिहरिष्यासि **ते मूर्धा विपतिष्यति** इति तमाहेत्यर्थः । **ह** इत्याकर्ण्य **ते** प्रस्तो-त्रादयः समारताः स्वस्वकर्मणः सकाशादुपरताः सन्त**स्तूष्णी-मासांचक्रिरे** तूष्णीं स्थितवन्तः । तत्तन्मन्त्रदेवताकर्मणां तत्सकाशादेव विज्ञानाय प्रतिपालयामासुरित्यर्थः ॥ ११ ॥

**इति श्रीदेवर्षिरमानाथसूरिकृते भगवद्धर्मबोधभाष्ये प्रथमाध्यायस्य दशमः खण्डः ।**

## अथप्रथमाध्यायस्यैकादशः खण्डः ।

**अथ हैनं यजमान उवाच भगवन्तं वा अहं विविदिषाणीत्युषस्तिरस्मि चाक्रायण इति होवाच ॥ १ ॥**

**अथे**ति । **अथ** तेषां तूष्णीभावानन्तरं ह आगतमात्रस्य नातिपरिचितस्य च तस्य तथा वैदुष्यमवलोक्येत्यर्थः । **एन**मुषस्तिं **यजमानो** राजो**वाच** पृच्छां चकारेत्यर्थः । पृच्छामनुवदति—'भो विद्वन् **भगवन्तं** सर्वेभ्यः श्रेष्ठं भवन्तं **वै** परिचयपूर्वक'**महं विविदिषाणि** यदि संमनुषे तर्ह्यहं त्वां ज्ञातुमिच्छामीति । **इति** एवं पृष्ट उषस्तिः प्रत्युवाच भो राजन्नहं **चाक्रायण**श्चक्रवंशोद्भवो नाम्नोषस्तिर्ब्राह्मणोऽस्मीति ॥ १ ॥

**सहोवाच भगवन्तं वा अहमेभिः सर्वैरार्त्विज्यैः पर्यैषिषं भगवतो वा अहमवित्याऽन्यानवृषि ॥ २ ॥**

**सहे**ति । ह प्रसिद्धत्वान्नामग्रहणेन परिचयं प्राप्तः **स** राजो**वाच** विज्ञापयांचकार । 'भोः पूज्यतम ! पूर्वमेवाहं **भगवन्तं** पूज्यतमं भवन्त**मेभिः** क्रियमाणै **सर्वैरार्त्विज्यै**र्निखिलैरपि ऋत्विक्कर्मभिर्हेतुभिः **पर्यैषिषं** सर्वतोऽन्वेषणमकार्षम् ।

यज्ञेऽस्मिन्भवत एव सर्वेषां कर्मणामृत्विजां चाचार्यकं दास्यामीति प्रयोजनेन भवदन्वेषणमहं बहु कृतवानित्यर्थः । गवेषणानन्तरं **भगवतः** सर्वगुणश्रेष्ठस्य परमविदुषश्च भवतोऽवित्त्याऽलाभेन, तवाप्राप्त्येत्यर्थः, **अन्यानेतानृत्विजोऽवृषि** वृतवानस्मि ॥ २ ॥

**भगवाꣳस्त्वेव मे सर्वैरार्त्विज्यैरिति, तथेत्यथ, तर्ह्येत एव समतिसृष्टाः स्तुवतां यावत्त्वेभ्यो धनं दद्यास्तावन्मम दद्या इति, तथेति ह यजमान उवाच ॥३॥**

**भगवानिति** । पुना राजोवाच, **भगवान्** पूज्यतमो भवानेव नान्यो मया पूर्वत एव मनसा **सर्वैरार्त्विज्यैः** सर्वैर्णार्त्विक्कर्मणा वृतोऽसीत्यर्थः । सर्वस्मिन्कर्मणीति शेषः । इत आरभ्य भवानेवैतत्कर्म कारयत्विति भावः । उषस्तिस्**तथेति**, यथा भवान्वदति तथैव भवत्विति प्रत्युवाच । **अथ** किंचिद्विचारानन्तरं पुनरुवाच । भो राजंस्**तर्ह्येवं** भवतु, **एत एव** पूर्वतो भवता वृता एते विद्वांसः ऋत्विज एव मया प्रसन्नेन अनुज्ञाताः सन्तः **स्तुवतां** स्तवनादि कर्म कुर्वन्तु । भवता तु केवलमिदं कर्तव्यं यत् **यावद्यत्परिमितं धनमेभ्यः** सर्वेभ्यो ऋत्विग्भ्यो **दद्याः** दास्यसि **तावत्**तत्परिमितमखिलतुल्यमेव द्रविणं **मम** मह्यमेकस्मै **दद्याः** दास्यसीत्युषस्तिरुवाच । **यजमानो** राजा **ह** प्रसन्नः संस्**तथे**त्युवाच स्वीचकारेत्यर्थः ॥३॥

**अथ हैनं प्रस्तोतोपससाद प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता तां चेदविद्वा-न्प्रस्तोष्यसि मूर्धा ते विपतिष्यतीति मा भगवानवोचत्कतमा सा देवतेति ॥४॥**

अथेति। अथैवमुषस्तिराज्ञोः परस्परं स्वीकारानन्तरम्। ह विनयपूर्वकमेनमुषस्तिं **प्रस्तोतोपससाद** गुरूपसत्तिं चकारोवाच च। अभिवादनपूर्वकं तत्समीपमागत्य तमेव-मपृच्छदित्यर्थः। भो आचार्य उषस्ते ! **यन्मां भगवान्** पूज्यतमो भवान् **प्रस्तोतर्या देवता प्रस्तावमन्वायत्ता तां चेदविद्वान्प्रस्तोष्यसि मूर्धा ते विपतिष्यती'त्यवोचत्**, तत्राहं त्वामेव पृच्छामि **सा देवता कतमा,** किंनाम्नी किंस्वरूपाचेत्यर्थः ॥ ४ ॥

आध्यात्मिकं प्राणरूपं ब्रह्म निरूपयितुं तदुत्तरं व्याहरति—

**प्राण इति होवाच सर्वाणिह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणम-भ्युज्जिहते सैषा देवता प्रस्तामन्वायत्ता तां चेदविद्वान्प्रास्तोष्यो मूर्धा ते व्यप-तिष्यत्तथोक्तस्य मयेति ॥ ५ ॥**

**प्राण इति**। एवं प्रस्तोत्रा पृष्ट उषास्तिर्होवाच प्रत्युत्तरं

दत्तवान् । किमिति चेत्, **प्राण इति** । भो प्रस्तोतः प्रस्ताववविषयो देवता प्राण एवास्तीत्यहं तवोत्तरं प्रदद इत्यर्थः । **ह** यतः कारणा**द्वै** निश्चये**नेमानि** श्रुतदृष्टानि चराचराणि **सर्वाणि भूतानि प्राणमेवाभिसंविशन्ति** प्राणब्रह्मण्येकी भवन्ति । प्राणमिव प्राणं जीवनहेतुत्वात्, ब्रह्मैव नान्यं प्राप्नुवन्तीत्यर्थः । संवेशो नाम सायुज्यं, तच्च ब्रह्मण्येकीभवनम् । यथोक्तं समाधिभाषासु 'नष्टे लोके द्विपरार्धावसाने महाभूतेष्वादिभूतं गतेषु । व्यक्तेऽव्यक्तं कालवेगेन याते भवानेकः शिष्यतेऽशेषसंज्ञः' इति । न केवलमभिसंवेश एव किन्तु ब्रह्मण एव सर्वं जगदुत्पद्यत इत्याह–**प्राणमभ्युज्जिहते** । प्राणादेव ब्रह्मणः सकाशादेतानि सर्वभूतानि सृष्टिप्रारम्भे पुनरुद्भवन्ति । इदं हि ब्रह्मणोऽसाधारणो धर्मो यत्सर्वजगदुत्पत्तिस्थितिभङ्गानामभिन्ननिमित्तोपादानकारणत्वम् ।

तच्चोपादानकारणत्वमिहाऽन्यानपेक्षस्य शब्दस्य स्वरसेनार्थबोधकत्वरूपाच्छ्रुतिसामर्थ्यलिङ्गात्, विभागे साकांक्षत्वे सत्येकार्थप्रतिपादकत्वरूपात्सर्वश्रुतिसमन्वयरूपाल्लिङ्गाच्च सिद्धमेवेति प्राणो ब्रह्मैव । यथोक्तं सर्वश्रुतिसंदेहनिरासकेन भगवता श्रीव्यासेन '**अत एव प्राणः**' इति । अत्र सूत्रे पूर्वाधिकरणस्थस्य तल्लिङ्गादित्यस्यातिदेशः । तेनाऽत्रापि तल्लिङ्गाच्छ्रुतिसामर्थ्यादेकवाक्यतायाश्च प्राणो ब्रह्मैवेत्यर्थः ।

ननु तल्लिङ्गादित्यस्य ब्रह्मलिङ्गादित्येवार्थः कथं न गृह्यत इति चेत्—न। तस्य जन्माद्यधिकरण एव सिद्धत्वात्तद्ग्रहणे-स्याधिकरणस्यैव व्यर्थता स्यात्। किं च यत्रैव लिङ्गस्य ब्रह्मपरत्वे कल्प्यमाने बाधकाभावस्तत्रैव ब्रह्मत्वं, अत्र तु बाधकानां विद्यमानत्वात्तल्लिङ्गादित्यस्य ब्रह्मलिङ्गादित्यर्थो विधातुं न शक्यः। तथाहि—'**यदा वै पुरुषः स्वपिति प्राणं तर्हि वागप्येति प्राणं चक्षुः प्राणं श्रोत्रं प्राणं मनः, स यदा प्रबुद्ध्यते प्राणादेवाधि पुनर्जायन्ते** इति श्रुतावासन्यप्राणेऽपि भूतसंवेशनादेरुक्तत्वात्साधार-' ण्यरूपस्य बाधकस्य सत्त्वात्। न च 'प्राणं तर्हि वाग-प्येती'त्यादिश्रुतावासन्ये इन्द्रियाणामेव संवेशनमुच्यते न तु भूतसंवेशनमिति न साधारण्यमिति शंक्यम्। 'दीपश्चक्षुस्तथा रूपं ज्योतिषो न पृथग्भवे'दिति पुराणोपबृंहणवाक्येष्विन्द्रि-याणां भूतापृथग्भावस्योक्तत्वेन भूतविशेषत्वस्य सिद्धतया-ऽऽसन्यसाधारण्यात्। तस्मादत्र तल्लिङ्गादित्यस्य श्रुतिसामर्थ्य मेकवाक्यता चार्थो ग्राह्यो न तु ब्रह्मलिङ्गादिति। तथा च सर्वश्रुतिवाक्येषु निःसंदिग्धेषु ब्रह्मैव जगदुत्पत्तिस्थितिप्रलय-कारणमिति सिद्धम्। एतद्धि श्रुतिसामर्थ्यम्। एकवाक्यता च सर्वासां ब्रह्मश्रुतीनां तथैव भवतीति तल्लिङ्गात्प्राणोऽत्र ब्रह्मैवेति सिद्धम्।

भवतु, प्रकृतमनुसरामः—भोः प्रस्तोतः **सैषा** प्राणरूपा

देवता **प्रस्तावं** सामविशेषं, **अन्वायत्ता** तद्विषयभूता-ऽऽस्ते । तां तद्विषयभूतां देवता**मविद्वान**जानन्नपि यदि त्वं **प्रास्तोष्यः** प्रस्तवनमकरिष्यस्तर्हि **मया तथोक्तस्य** मा प्रास्तौषीरिति निषिद्धस्य **ते** तव मूर्धा **व्यपतिष्यत्** ॥५॥

आदित्यस्थं परं ब्रह्म निरूपयितुमुद्गाता पर्यनुयुङ्क्ते—

**अथ हैन मुद्गातोपससादोद्गातर्या देव-तोद्गीथमन्वायत्ता तां चेदविद्वानुद्गा-स्यसि मूर्धा ते विपतिष्यतीति मा भगवानवोचत्कतमा सा देवतेति ॥६॥**

**अथ हैनमिति । अथह** तदनन्तरमुद्गाता सामप्रधान-गायकः एनमुषस्तिमुपससाद, गुरुत्वेन शरणं जगाम । भो गुरो ! उषस्ते यद्भगवान्पूज्यतमो भवान्पूर्वं मामवोचदुद्गातर्या **देवता**धिष्ठात्री उद्गीथं सामविशेष**मन्वायत्ता** तद्विषयत्वेन स्वीकृता तां **चेदविद्वां**स्त्वं मम विदुषः पुर **उद्गास्यसि मूर्धा ते विपतिष्यतीति** तदिदानीमहं **भगवन्तं** भव-न्तमेव पृच्छामि **सा** उद्गीथविषया **देवता कतमा** किंनाम्नी किंस्वरूपा चेति ॥ ६ ॥

उद्गातारमुत्तरयति—

**आदित्य इति होवाच सर्वाणि ह वा इमानि भूतान्यादित्यमुच्चैः सन्तं गायन्ति**

**सैषा देवतोद्गीथमन्वायत्ता तां चेदवि-द्वानुद्गास्यो मूर्धा ते व्यपतिष्यत्तथो-क्तस्य मयेति ॥ ७ ॥**

**आदित्य इति ।** **अथोषस्तिराचार्यस्तदुत्तरमादित्य इति होवाच ।** उद्गातरुद्गीथविषयभूता देवताऽऽदित्यो-स्तीति तमुषस्तिःप्रत्युवाचेत्यर्थः । कुत इति चेत्—ह वेदवि-द्भिर्ज्ञाततरमिदं **यदिमानि** प्रसिद्धानि **सर्वाणि** श्रुतदृष्टानि भूतानि, **उच्चैःसन्तं** सर्वश्रेष्ठत्वेन स्थित**मादित्यं वा** परं ब्रह्मैव **गायन्ति** कीर्तयन्ति । **सा** एषाऽऽदित्यरूपा **देवतो-द्गीथमन्वायत्ता** सामविशेषविषयभूताऽस्ति । **तां चेत्त्वम-विद्वानपि** मम तद्विदुषोऽग्रे उदगास्यो गानमकरिष्यस्तर्हि **मया तथोक्तस्य** निषिद्धस्य ते **मूर्धा** व्यपतिष्यत् । इत्येवमुषस्ति-रुत्तरयांचकारेत्यर्थः ॥ ७ ॥

**अथ हैनं प्रतिहर्तोपससाद प्रतिहर्तर्या देवता प्रतिहारमन्वायत्ता तां चेदविद्वा-न्प्रतिहरिष्यसि मूर्धा ते विपतिष्यतीति मा भगवानवोचत्कतमा सा देवतेति ८**

**अथेति ।** **अथ ह** तदनन्तरं **प्रतिहर्ता** प्रतिहारदेव-ताविषयककर्मकर्ता ऋत्विग्विशेषः **एनमुषस्तिमुपससाद,** गुरूपसत्तिं चकारेत्यर्थः । भो विद्वन् पूर्वं **भगवान्पूज्यतमो**

भवानवोचत्प्रतिहर्तर्यादेवता **प्रतिहारमन्वायत्ता** प्रतिहारविषयाऽस्ति **तां** **चेत्त्वमविद्वान्**प्रतिहरिष्यासि मूर्धा ते विपतिष्यतीति, तदहं भवन्तमेव विश्रभ्याऽनुयुनज्मि भगवन्स देवता कतमेति ॥ ८ ॥

अन्नोपलक्षितं विराट्पुरुषं निरूपयंस्तदुत्तरं व्याहरति—

**अन्नमिति होवाच सर्वाणि ह वा इमानि भूतान्यन्नमेव प्रतिहरमाणानि जीवन्ति सैषा देवता प्रतिहारमन्वायत्ता तां चेदविद्वान्प्रत्यहरिष्यो मूर्धा ते व्यपतिष्यत्तथोक्तस्य मयेति तथोक्तस्य मयेति ॥९॥**

**अन्नमिति**। अन्नमेव प्रतिहारविषयभूता देवतेति प्रतिहर्तारमुषस्तिर्**होवाच** कथयामास । **ह वा** यतःकारणा**दिमानि सर्वाणि भूतानि** दृष्टश्रुतसर्वप्राणिनोऽन्नमेव **प्रतिहरमाणानि जीवन्ति**। सर्वे जीवा अन्नस्यैव संग्रहं कुर्वाणा जीवनं धारयन्तीत्यर्थः। **सा एषा** सर्वप्रसिद्धा **देवता प्रतिहारमन्वायत्ता** तद्विषयभूताऽस्ति। **तां चेत्त्वमविद्वा**नपि विदुषो मम पुरः प्रत्यहरिष्यस्तर्हि **मया तथोक्तस्य** निषिद्धस्य ते मूर्धा व्यपतिष्यदित्यादि पूर्ववत् । द्विरुक्तिः खण्डसमाप्तिबोधिका ॥ ९ ॥

**इति श्रीदेवर्षिरमानाथसूरिकृते भगवद्धर्मबोधभाष्ये प्रथमस्यैकादशः खण्डः ।**

## अथ प्रथमाध्यायस्य द्वादशः खण्डः ।

पूर्वखण्डे उषस्तिचरित्रेऽन्नालाभात्कष्टा दशा वर्णिता, सा कस्यापि मा भवत्विति तदुपायोऽपि वेदविज्ञाने वर्तत इति कनिष्ठाधिकारिणां प्रवृत्त्यर्थमधिकारविशेषसंपत्त्यर्थं चोपासनान्तरं संप्रत्युपदिशति—

**अथातः शौव उद्गीथस्तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेयः स्वाध्यायमुद्वव्राज ।१।**

**अतोऽत इति ।** अथेति काम्योपास्तिप्रक्रमभेदद्योतकोऽव्ययः। **अतः** उद्गीथोपासनेन कामपूर्तिरपि भवतीत्यतो हेतोः **शौव** उद्गीथः ( प्रस्तूयते ) । **शौवः**श्वरूपधारिणा प्राणदेवेन दृष्ट, उद्गीथः उद्गानरूपं साम प्रस्तूयते । अन्नप्राप्तयेऽपि भगवद्रूपोद्गीथसामोपासनं कर्तव्यमित्यर्थः । **तत्** तस्मिन्निषये **ह** एवमैतिह्यं वर्तते । यत्—**दाल्भ्यः** दल्भस्यापत्यं पुमान् बकनामर्षिः **वा** किंच **मैत्रेयो** मित्रायाश्चापत्यं पुमानयमेव ग्लावो ग्लावर्षिः । तेनायमृषिद्व्यामुष्यायण इति ज्ञायते । स हि विपश्चित्पुत्रोपि काम्यविषयकसामासक्त इत्याचार्यान्तरं कामयमानः **स्वाध्याय**मभीष्टतत्सामाध्ययनार्थ**मुद्वव्राज** बहिः स्थानान्तरं गतवान् । जलादिसौकर्यवद्विविक्तदेशं कंचन गतवानित्यर्थः ॥ १ ॥

तस्य पूर्वस्वाध्यायेन तुष्टो देवस्तमनुजग्राहेत्याह—

**तस्मै श्वा श्वेतः प्रादुर्बभूव तमन्ये श्वान उपसमेत्योचुरन्नं नो भगवानागायत्वशनायाम वा इति ॥ २ ॥**

**तस्मा इति** । तस्मै ग्लावर्षये तस्मिन्ननुग्रहं कर्तुं, **श्वेतः** शुक्लो निर्दोषः **श्वा** श्वरूपग्राही मुख्यः प्राणदेवः **प्रादुर्बभूव** प्रकटो बभूव । तं मुख्यप्राण**मन्ये** तदनुजीविनः **श्वान**स्तद्वृत्तिसमानवृत्तीनि गर्घावन्ति वाक्प्रभृतीनीन्द्रियाणीत्यर्थः । **उपसमेत्य** दैन्येनोपसर्पणं कृत्वा **ऊचु**रुक्तवन्तः । वचनमेव निर्दिशति—**अन्न**मित्यादि । **भगवान्** सर्वेष्वस्मासु सामर्थ्यप्रदः सर्वश्रेष्ठो भवान्**नो**ऽस्मभ्यं सर्वेभ्यः संप्रत्य**न्नमागायतु** अन्नमस्मासु प्रापयत्वित्यर्थः । शब्दादिसामर्थ्यदानेनास्माननुगृह्णात्विति भावः । प्राणोहि स्वयमन्नमुपयुज्याभोक्तृष्वपि वागादीन्द्रियेषु तत्प्रापयतीति तानि तं प्रार्थयन्ति । ननु भवतामन्नस्य किं प्रयोजनमित्याशङ्क्याह—**अशनायाम वा इति** । वयं सर्वे बुभुक्षिता स्म इति हेतोः । अन्नरसमन्तरा वयं सर्वे तत्कार्याणि कर्तुमसमर्था भविष्यामस्ततो तद्वाञ्छाम इत्यर्थः । चेतनसाहाय्येन प्राण इवेन्द्रियाण्यपि अन्नभुजो भवन्तीति न शङ्कावसरः ॥ २ ॥

तदुत्तरं व्याहरति—

**तान्होवाचेहैव मा प्रातरुपसमीयातेति तद्ध बको दाल्भ्यो ग्लावो वा मैत्रेयः प्रतिपालयांचकार ॥ ३ ॥**

**तान्निति** । **ह** पोष्यैः श्वरूपैस्तैरेवं प्रार्थिते सति **श्वेतः श्वा तान्** बुभुक्षया दीनांस्तानु**वाचा**कथयत्, भोःश्वानः यूयं सर्वे प्रातः प्रातःकाले सात्त्विकसमये **मां** मत्समीप**मुपसमीयात** समागच्छत। सात्त्विकवृत्त्या मत्संमुखीना भवतेत्यर्थः। **तत्** ह तत्रैव तस्मिन्नेवविषय इत्यर्थः । बको दाल्भ्यो ग्लावो वा मैत्रेयः पूर्वोक्तर्षिः **प्रतिपालयांचकार** । तदुक्तसमये सर्वतः पूर्वमेवोपस्थितो दाल्भ्य स्तेषामागमनस्य तस्यागनस्य च प्रतीक्षां चकारेत्यर्थः । प्रातःसमयेऽन्नदः सूर्यः संमुखीनो भवति न तुऽपराह्णे इति प्रातरुक्तम् । किंवा प्रातरेव प्राणकार्यं सुकरं भवतीति तथोक्तम् । तदर्थप्रतीक्षया हि ऋषेरप्यन्नकामनाऽऽस्तीति ज्ञायते ॥ ३ ॥

प्रातःकृत्यमाह—

**ते ह यथैवेदं बहिष्पवमानेन स्तोष्यमाणाः सꣳरब्धाः सर्पन्तीत्येवमाससृपुस्तेह समुपविश्य हिं चक्रुः ॥ ४ ॥**

**ते ह्येति** । ह एवमनुश्रूयते यत्—यथैवं येन प्रकारेणैव **बहिष्पवमानेन** तन्नामकेन स्तोत्रेण पवमानसूक्तेन **स्तोष्य-माणाः** स्तुतिं कर्तुमिच्छन्तो यजमानपंचमा उद्गातारो नामर्त्विजः संरब्धास्तत्कार्यतत्पराःसन्तः **सर्पन्ति** परस्परमु-त्तरीयग्रहणपूर्वकं चात्वालदेशं प्रति परिक्रामन्ति, एवमेतत्प्र-कारेणैव **ते श्वानः** ह परस्परमेकैकस्य पुच्छं मुखे गृहीत्वा-ऽऽ**ससृपुः** परिभ्रमणं चक्रुः । ह एवं परिक्रम्य च **समुप-विश्यै**कत्र स्थित्वा **हिं चक्रुः** हिंकारगानं कृतवन्तः । गान-प्रारम्भसूचकं हिंकारालापं कुर्वन्ति स्मेत्यर्थः ॥ ४ ॥

तदनन्तरं यद्गानं कृतवन्तस्तदाह—

**ओ३मदा३मों३पिबा३मों३देवो वरुणः प्रजापतिः सविताऽ२न्नमिहाऽऽ२हरदन्न-पते३ऽन्नमिहा३ऽऽहराऽ३ऽहरो३मिति ॥५॥**

**ओमिति** । ओंकारत्रयमत्र प्राथमिकस्वरालापार्थकम् । **ओं अदाम** भोजनं करवाम । ओं **पिबाम** पानं करवाम । वयं सर्वे इति शेषः । स्वाशिषि लोट् । प्रार्थनायां वा । प्रार्थ-नामेव प्रकाशयति—**देवः** सर्वप्रकाशको **वरुणः** पर्जन्यरू-पेण वर्षाकृत् प्रजापतिः पूर्वोक्तप्रकारेण प्रजानां परिपालकः **सविताऽयं** प्रसिद्धः सूर्यः सर्वविधपदार्थजातप्रसूतिमूलो यस्त्वं पूर्व**मन्नमाहरन्** अन्नप्रसूतिं करोति स्म, स

एव **त्वमन्नपते** **इहात्र** प्रदेशेऽस्मभ्यमिदानी**मन्नमाहरो-**
**मन्नप्रसूतिं विधेहि** । आदरात्पुनः प्रार्थयते **अन्नमाहरो-**
**मिति** । प्रकाशप्रतापवर्षणैः सविताऽन्नादिपदार्थान्प्रतनुत इति सर्वलोकप्रत्यक्षम् । एवमत्र सूर्योऽन्नपतिः स्तुतोऽन्न-कामनया । सर्वे ओंकार अत्र मन्त्रत्वप्रकाशकाः । इति शब्दश्च स्तुतिसमाप्त्यर्थकः ॥ ५ ॥

इति देवर्षिभट्टश्रीरमानाथसूरिकृते भगवद्धर्म-
बोधभाष्ये प्रथमाध्यायस्य द्वादशः खण्डः ।

# अथ प्रथमाध्यायस्य त्रयोदशः खण्डः ।

सामावयवभक्तिविषयोपासनमुक्तं पूर्वखण्डेषु सम्प्रति सामावयवान्तरस्तोभाक्षरोपासनमुपदिश्यते—

**अयं वाव लोको हाउकारो वायुर्हाईकारश्चन्द्रमा अथकारः । आत्मेहकारोऽग्निरीकारः ॥ १ ॥**

**अयं वावेति । अयं लोको वाव** पृथ्वीलोक एव **हाउकारः** हाउकारस्तोभाक्षराणि । अस्तीति शेषः । पृथ्वीलोक एव साम्नः स्तोभाक्षराणां दृष्ट्योपास्य इत्यर्थः । पृथ्वीलोके हाउकारनामकस्तोभाक्षरदृष्टिः कर्तव्येति भावः । हाउ इति स्तोभः । स्तोभो नामाक्षरसहयोगः । यथा लौकिकगीतिषु तालावधानार्थं सार्थानि निरर्थानि वा 'हो रामा' इत्यादीन्यक्षराणि संयोज्यन्ते, स स्तोभ उच्यते । तथा गानात्मके साम्न्यपि स्तोभो भवति । भिन्नभिन्नप्रकाराश्च स्तोभाः सन्ति । रथान्तरसाम च पृथिव्याः । अत एव हाउकारोऽपि तत्सामस्तोत्रत्वात्पृथ्वीदृष्टयैवोपास्य इत्युक्तम् । सामशब्देन वैदिकभाषायां सीमा प्रोच्यते । सामानि सीमान इत्यनर्थान्तरम् । इह तु तत्साम्नः स्तुतिगानमपि सामेत्युच्यत । यथा सूर्यगवां ( किरणानां ) सामानि भवन्ति तथा पृथिव्या अपि तानि । विस्तरे सहस्रं

सामानि। अन्यथा त्वन्यथेत्यन्यत्र द्रष्टव्यम् । रथन्तरं हि पृथिव्याः साम । यथोक्तं तैत्तिरीयब्राह्मणे ( १–४–६ ), 'उभे बृहद्रथन्तरे भवतः। इयं वाव रथन्तरम्। असौ बृहत्। अन्यत्र च श्रुतिः 'इयं वै रथन्तरम्'। तस्माद्धाउकारो रथन्तरसामस्तोभ इति पृथ्वीलोकदृष्ट्योपास्य इत्युक्तम् । **हाइकारः** स्तोभो **वायुः** । हाइकारस्तोभं वायुदृष्ट्योपासीतेत्यर्थः। **अथकारश्चन्द्रमाः** । अथकारस्तोभं चन्द्रमसं विजानीयात्। **इहकारः आत्मा** प्रसिद्धः। इहकारे स्तोभे आत्मदृष्टिः कर्तव्या। **ईकारोऽग्निः** । ई इति स्तोभः । तत्राऽग्निरिति दृष्टिः कर्तव्येत्यर्थः ॥ १ ॥

**आदित्य ऊकारो निहव एकारो विश्वे**
**देवा ओहोयिकारः प्रजापतिर्हिंकारः**
**प्राणःस्वरोऽन्नं या वाग्विराट् ॥ २ ॥**

**आदित्य इति** । उकारस्तोभमादित्यं विजानीयात्। **एकारो निहवः**। एकारस्तोत्रं निहव इत्युपासीत। निहव आव्हानम्। एहीति लोका आव्हयन्ति तदाद्याक्षरसाम्यादेकारो निहवः। **ओहोयिकारः प्रजापतिः** परमात्मा। ओहोयिकारे परमात्मदृष्टिर्विधेया । **हिंकारः प्राणः**। हिंकारस्तोभं प्राण इति बुद्ध्येत। **या अन्नम्**। येति स्तोत्रमन्नदृष्ट्योपासीत। **वाक् विराट्**। वाचि स्तोत्रे

विराड्दृष्टिः कर्तव्येत्यर्थः । वैराजे साम्नि वागिति स्तोभो भवति ॥ २ ॥

**अनिरुक्तस्त्रयोदशः स्तोमः संचरो हुंकारः ॥ ३ ॥**

**अनिरुक्त** इति । वावेतिस्तोत्रगणनया **त्रयोदशो हुंकारः संचरः** शाखाभेदेन विविधस्वरूपतां भजते इत्यर्थः । तस्मात्स **स्तोमोऽनिरुक्तो**ऽनिरुक्तप्रजापतिरस्ति । अनिरक्तः कारणरूपं ब्रह्म । तद्ध्यनेकरूपाणिं भजते स्वसामर्थ्यात् । हुंकारेऽप्यनेकरूपभजनं वर्तत इति तत्साम्यं तत्रानिरुक्तदृष्टिः कर्तव्येति युक्तमुत्पश्यामः ।

स्तोभाक्षरोपासनस्य फलमाह—

**दुग्धेऽस्मै वाग्दोहं यो वाचो दोहोऽन्नवानन्नादो भवति य एतामेवꣳ साम्नामुपनिषदं वेदोपनिषदं वेद ॥ ४ ॥**

**छान्दोग्यप्रथमाध्यायः सम्पूर्णः ।**

---

**दुग्ध** इति । **यो** जनो **वाचो दोहं** वाचो विचारणामुक्तप्रकारेण करोति, **अस्मै** वाग्विचारकाय **वाक्** स्वयमेव **दोहं** तन्मनोरथान् **दुग्धे** प्रपूरयति । **यश्च** जन **एता**

मनुपदमुक्तां **साम्नामुपनिषदं** सामविज्ञान**मेव**मुक्तप्रकारेण **वेद** जानाति स हि स्वय**मन्नवान्सन्नन्नादश्च** तद्वोक्ता च **भवति** ॥ ४ ॥

**इति देवर्षिभट्टश्रीरमानाथसूरिकृते भगवद्धर्मबोधभाष्ये प्रथमाध्यायस्य त्रयोदशः खण्डः सम्पूर्णः ।**

**इति छान्दोग्योपनिषद्भाष्ये प्रथमाध्यायः सम्पूर्णः**

Library IIAS, Shimla
S 294.592 1 R 141
00009190